
876

Sl No. 12437 **वृष्टयज्ञविधिः** **Ms. No. P. 3646/20**

वृष्टिप्रदायककर्मविधिः(शालिहोतीय)

Beginning :

अथांतस्सम्प्रवक्ष्यामि कर्म वैष्टिप्रदायकम् ।
शालिहोत्रेण मुनिना उक्तं लोकहिताय च ॥

आचार्यं वरयेद्विद्वान् कर्मज्ञं विनयान्वितम् ॥

End :

अतीते पञ्चरात्रे तु महावैष्टिमवाप्नुयात् ।
ततो भवेन्महावैष्टिः नात्र कार्या विचारणा ।।

Colophon :

— — —

877

Sl. No. 12438 **वृष्टियज्ञविधिः** Ms. No. P. 3646/22

(वृष्टिप्रदायककर्मविधिः)

Beginning :

अतःपरं प्रवक्ष्यामि कर्म वृष्टिप्रदायकम् ।
नाभिमात्रे जले स्थित्वा गृहसामानि सुस्वरम् ।।

सोमं राजानमेतच्च प्रमित्रेति त्रयं तथा ।।

End :

अतीते पञ्चरात्रे तु प्रौढां वृष्टिमवाप्नुयात् ।
एवं प्रोक्तं वृष्टियज्ञं शालिहोत्रेण धीमता ॥

Colophon : .

– – –

878

Sl. No. 12439 **वृष्टियज्ञविधिः** Ms. No. P. 4720/18

(वैकृतिप्रसवशांतिविधिः–शालिहोत्रीया)

Beginning :

वैकृतिप्रसवशांतिविधिरुच्यते—

अकालप्रसवा नार्यः कालातीतप्रजास्तथा ।
विकृतिप्रसवाश्चैव धूमप्रसवनास्तथा ॥

अमानुषा अखण्डाश्च अज्ञान × जनास्तथा ।
हीनाङ्गा अधिकाङ्गाश्च जायन्ते यदि वा स्त्रियः ॥

End:

पशवः पक्षिणश्चैव तथैव च सरीसृपाः ।
विनाशं तस्य देवस्य कृतस्य च विनिर्दिशेत् ॥

निर्वासयेत्तान्नृपतिश्च राष्ट्रात्
स्त्रियश्च पूज्याश्च ततो द्विजेन्द्राः ।
चिकित्सनैः ब्राह्मणतर्पणैश्च
ततो .... शांतिं मसुपैति पापात् ॥

Colophon :

– – – –

879

Sl. No. 12440 **वैधृत्यादिजननशांतिः** **Ms. No. P. 734/9**

Beginning :

वैधृतौ च प्रसूतायां स्त्रियो वा पुरुषस्य वा ।
मातरं पितरं हंति भ्रातरं हन्ति वा पुनः ॥

\+ + + +

तिष्ठतः पुष्कलं कार्यं तस्य दोषो विनश्यति ॥

End :

तच्छांतिं कारयेच्चैव वेदोक्तायुर्भविष्यति ।
तस्मात्सर्वप्रयत्नेन शांतिं कुर्याद्विचक्षणः ॥

Colophon :

इति वैधृत्यां जननशांतिः ॥

880

Sl·No 12441 वैधृत्य दिजननशांतिः Ms. No· P· 734/10

(वैधृतिशांतिः- शौनकीया)

Beginning :

नमस्तेऽस्तु व्यतीपात सोमसूर्यसुत प्रभो ।
यद्दानादिकृतं किञ्चित् न × क्षिष्यामि ×स्तु ने ॥

अथातः सम्प्रवक्ष्यामि शौनकः शांतिमुत्तमाम् ।
वैधृतौ च व्यतीपाते महादोषोऽभिजायते ॥

End :

सर्वदुःखनिवृत्तिश्च पुत्रपौत्रविवर्धनम् ।
सर्वान् कामानवाप्नोति वेदोक्तायुर्भवेद्ध्रुवम् ॥

Colophon :

इति शौनकीये वैधृतिशांतिः व्यतीपातशांतिश्च समाप्ते ॥

881

Sl. No 12443 वैधृत्यादिजननशांतिः Ms No. P. 2239/60

(पुष्कलाचार्यमतानुसारिणी)

Beginning :

कुमारजन्मकाले च वैधृत्यां च समागते ।
मातापित्रोश्शिशोर्हानिः अथवा व्याधिपीडनम् ॥
धनवानधनो वाऽपि लभते नात्र संशयः ॥

End:

दक्षिणार्थं च गां दद्यात् दशदानादिपूर्वकम् ।
एवं यः कुरुते शांतिं सर्वगण्डापनुत्तये ॥
पुत्रपौत्रैः परिवृतः जीवेत्स शरदां शतम् ।

Colophon:

इति पुष्कलाचार्यमते वैधृतिजननशांतिः ॥

882

Sl. No 12444 वैधृत्यादिजननशांतिः **Ms. No. P. 3023/46**

Beginning :

कुमारजन्मकाले तु वैधृतेश्च समागमे ।
मा × × शिशोर्हानिः अथवा व्याधिपीडनम् ॥
धनधान्यादिदारिद्र्यं लभते नात्र संशयः ॥

End :

दक्षिणार्थं च गां दद्यात् दशदानादिपूर्वकम् ।
एवं यः कुरुते शान्ति सर्वगण्डापनुत्तये ॥
पुत्रपौत्रैः परिवृतः जीवेत्स शरदां शतम् ॥

Colophon:

इति × × × चार्यविरचिते वैधृतिजननशान्तिः ॥

883

Sl.No. 12446 वैधृत्यादिजननशांतिः **Ms. No. P. 4992/22**
(पुष्कलाचार्यीया)

Beginning :

कुमारजन्मकाले तु वैधृत्याश्च समागमे ।
मातापित्रोश्शिशोर्हानिः अथवा व्याधिपीडनम् ॥
धनवानपि दारिद्र्यं × × ते नात्र संशयः ॥

End :

एवं यः कुरुते शांतिं सर्वगण्डापनुत्तये ।
पुत्रपौत्रैः परिवृतः जीवेच्च शरदां शतम ॥

Colophon :

इति पुष्कलाचार्यमते वैधृतिजननशान्तिः ॥

884

Sl. No. 12451 वैधृत्यादिप्रथमार्तवशांतिः (गौतमोक्ता) Ms. No. P. 2239/24

Beginning :

वैधृतौ व्याधिपीडा च नारीणां प्रथमार्तवे ।
पतिपुत्रविनाशश्च दारिद्र्यं भवति ध्रुवम् ॥
तस्माच्छान्ति प्रकुर्वीत दम्पत्योरभिवृद्धये

End :

ऋत्विग्भ्यो दक्षिणां दद्यात ब्राह्मणान् भोजयेच्छतम् ।
एवं यः कुरुते शान्ति गौतमोक्तविधानतः ।:
सर्वदोषविनिर्मुक्तः पुत्रपौत्रादिमान् भवेत् ।।

Colophon :

इति गौतमोक्तवैधृतिरजस्वलाशान्तिः ॥

885

Sl. No. 12453 वैधृत्यादिप्रथमार्तवशांतिः Ms. No. P. 3128/10
(वैधृति-व्यतीपात-संक्रान्तिशांतिः- शौनकोक्ता)

Beginning:

अथातः सम्प्रवक्ष्यामि शौनकः शान्तिमुत्तमम् ।
वैधृतौ च व्यतीपाते महादोषोऽभिजायते ॥

कुमारजन्मकाले तु व्यतीपातश्च वैधृतिः ।
संक्रमश्च रवेस्तस्मिन् जातो दारिद्र्यकारकः ॥

End :

एवं यः कुरुते मर्त्यो न च दुःखमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोरपि ॥

सर्वदुःखनिवृत्यर्थं पुत्रपौत्रादिवर्धकान् ।
सर्वान् कामानवाप्नोति सुखी भूत्वा चिरं वसेत् ॥

Colophon:

इति शौनकीये वैधृतिव्यतीपातसंक्रान्तिशान्तिविधिः ॥

886

Sl. No 12465 वैधृत्यादिप्रथमार्तवशांतिः **Ms. No. P. 995/86**
(व्यतीपातशांतिः– गार्ग्योक्ता)

Beginning :

अथातः सम्प्रवक्ष्यामि शृणु शौनक यत्नतः ।
वैधृते च व्यतीपाते व्यासनिममज्ञादम (?) ॥

जनने च रजोदर्शे व्यतीपातादि सम्भवेत् ।
स्त्रीणां च सर्वदुःखं च सर्वनाशो भवेध्द्रुवम् ॥

End :

वैधृतौ सर्वदेवानां नित्यमुत्सवकारका ।
नित्यकर्मकृतां कर्ता सर्वदेवनमस्कृता ॥

जन्मान्तरकृतं पापं अस्मिन् जन्मनि यत्कृतम् ।
तत्सर्वं नाशयाशु × × वैधृतौ तु नमोस्तुते (!) ॥

Colophon:

गार्ग्योक्ता व्यतीपातशान्तिः ॥

887

Sl. No. 12469 वैश्वानराग्निमांद्यशांतिः (बोधायनोक्ता) Ms. No. P. 7970/75

Beginning :

अग्निमान्द्यस्य रोगस्य अजीर्णस्य विशेषतः ।
आरोग्यादिमहारोगयुक्तस्य वमनात्मनः ॥

अन्नदर्शनमात्रेण असंख्योपद्रवस्य च ।
प्रतीकारं प्रवक्ष्यामि :बुधबोधायनोक्तितः ॥

End :

नीरोगी नात्र सन्देहः जठराग्नियुतो नरः ।
विनिर्मुक्तस्तदा शक्तः सर्वदा - च जनप्रियः ॥

तेजस्वी दृढकायश्च जीवेच्च शरदां शतम् ।
समस्ताग्न्यभिमन्त्रेण तदन्नं भोजयेत्तदा ॥

Colophon :

इति बोधायनोक्तः अरुच्यग्निमान्द्यहरशान्तिजपविधिः समाप्तः ॥

888

Sl. No. 12470 व्यतीपातवैधृतिजननशांतिः (शौनकीया) Ms. No. P. 7970/35

Beginning :

अथातः सम्प्रवक्ष्यामि शृणु गौतमसत्तम ।
वैधृतिव्यतिपाते तु यदि नारी प्रसूयते ॥

शोकदुःखभयावाप्तिः निर्धनत्वं च रोगिता ।
पत्युर्वियोगो वन्ध्यात्वं मृतपुत्रत्वमेव च ॥

End :

सर्वत्र रश्मयः सूर्यः त्रिगत्मकसुतः (?) प्रभो ।

सूर्यप्रतिमादानमन्त्रः—

श्वेताम्बरः श्वेतविभूषणश्च
श्वेतद्युति र्दण्डधरो द्विबाहुः ।
चन्द्रामृतात्मा वरदः किरीटो
श्वेतां स मह्यं विदधाति मह्यम् (?) ॥

Colophon :

इति शौनकीये व्यतीपातवैधृति शान्तिः ॥

889

Sl. No. 12471 **व्यतीपातवैधृतिदानमन्त्रः** **Ms. No. P. 9254/192**

Beginning :

व्यतीपात नमस्तेऽस्तु सोमसूर्यसुत प्रभो ।
यद्दानादिकृतं किञ्चित्तदक्षय्यमिहास्तु मे ॥

End :

व्यतीपातवैधृतिदानमन्त्रौ—

वैधृतौ सर्वदेवानां नित्यमुत्सवकारक ।
नित्यकर्मकृतं कर्ता सर्वदेवनमस्कृत ॥

जन्मान्तरकृतं पापं यस्मिन् जन्मनि यत्कृतम् ।
तत्सर्वं नाशयाशु त्वं वधृनोऽसि नमोऽस्तु ते ॥

Colophon

— — — —

890

Sl. No. 12472 व्यतीपातवैधृतिप्रथमार्तवशांतिः Ms. No. P. 9254/190

(ग्रन्थान्तरस्था शौनकोक्तेति वर्णिता)

Beginning :

ग्रन्थान्तरे व्यतीपातवैधृतिरजस्वलाशान्तिः—

अथातः सम्प्रवक्ष्यामि शृणु शौनक यत्नतः ।
वैधृतौ च व्यतीपाते रजोदोषात्प्रकल्पयेत् ॥

प्रथमार्तवकाले तु व्यतीपाते तु सम्भवे ।
स्त्रीणां च सर्वदुःखं च सर्वनाशो भवेद्ध्रुवम् ॥

End:

आचार्यं पूजयित्वा तु दैवज्ञं च विशेषतः ।
गोदानं वस्त्रदानं च स्वर्णदानं विशेषतः ॥

प्रच्छादनपटं दद्यात्ततः शान्तिर्भविष्यति ।
आयुरारोग्यमैश्वर्यमवैधव्यमवाप्नुयात् ।
सर्वदुःखनिवृत्यर्थं पुत्रपौत्रविवर्धनम् ॥

Colophon :

— -- -- --

891

Sl.No. 12473 व्यतीपातवैधृतिप्रथमार्तवशांतिः Ms. No. P. 9764/5

(गौतमोक्ता)

Beginning :

अतःपरं प्रवक्ष्यामि शृणु गौतमसत्तम
वैधृतौ तु व्यतीपाते यदि नारी रजस्वला ॥

शोकदुखभयावाप्तिः निर्धनत्वं च रोगिता ।
पतिहीना च वन्ध्या वा मृतपुत्राह्यभर्तृका ॥

End :

आज्यावलोकनं कुर्यान्नैववस्त्रादिधारणम ।
× × ततो दद्यात्सवत्सां प्रतिमां च गाम् ॥

ऋत्विग्भ्यो दक्षिणां दद्याद्ब्राह्मणानां च भोजनम ।
सर्वदोषविनिर्मुक्तः पुत्रपौत्रधनान्वितः ॥

× × × × × ॥

Colophon :

इति गौतमप्रोक्तव्यतीपातवैधृतिरजस्वलाशान्तिः ॥

892

Sl. No. 12475 व्यतीपातशांतिविधिः (शौनकीया) Ms. No. P. 60/11

Beginning :

अथ व्यतीपातशान्तिविधिरुच्यते–

अथातः सम्प्रवक्ष्यामि शौनकः शान्तिमुत्तमाम् ।
वैधृतौ च व्यतीपाते महादोषोऽभिजायते ॥

कुमारजन्मकाले तु व्यतीपातश्च वैधृतिः ।
संक्रमश्च रवेस्तत्र जातो दारिद्र्यकारकः ॥

End :

एवं यः कुरुते मर्त्यो न च दुःखमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोरपि ॥

सर्वदुःखनिवृत्यर्थं पुत्रपौत्रप्रवर्धनम् (?) ।
सर्वान् कामानवाप्नोति सुखीभूत्वा चिरं वसेत् ॥

Colophon :

इति शौनकीये वैधृतिव्यतीपातशान्तिः । संक्रमणशान्तिः ॥

893

Sl. No. 12477 व्यतीपातादिजननशांतिः **Ms. No. P. 2239/59**
(रुद्रयामलीया- गौतमं प्रत्युक्ता)

Beginning :

अथातः संप्रवक्ष्यामि शृणु गौतमसत्तम ।
वैधृतौ च व्यतीपाते ×××री प्रसूयते ॥
शोकदुःखभयप्राप्तिः निर्धनत्वं च रोगिता ॥

End :

एवं यः कुरुते शान्ति सद्यो दोषापनुत्तये ।
सर्वदोषविनिर्मुक्तः पौत्रपौत्रसमन्वितः ।
दम्पत्योश्च शिशोश्चैव सौम्यमायुश्च विन्दति ॥

Colophon :

इति रुद्रयामले व्यतीपातजननशांतिः ॥

894

Sl. No. 12479 यतीपातादिजननशांतिः **Ms. No. P. 3023/45**
(पुष्कलाचार्यीया)

Beginning :

कुमारजन्मकाले तु व्यतीपातस्य संभवे ।
अतिदुःखं च दारिद्र्यं पितृनाशो भवेत्तथा ॥
दारिद्र्यजं महद्दुःखं व्याधिपीडा महद्भयम् ॥

End:

एवं यः कुरुते शांतिं न स दोषमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं मातापित्रोश्शिशोर्भवेत् ॥

Colophon:

इति पुष्कलाचार्यविरचितव्यतीपातजननशांतिः ॥

895

Sl. No. 12483 व्यतीपातादिजननशान्तिः Ms. No. P. 4992/21

Begining:

कुमारजन्मकाले तु व्यतीपातस्य संभवे ।
अतिदुःखं च दारिद्र्यं पितृनाशो भवेद्यदि ॥
दरिद्राणां महादुःखं व्याधिपीडा महद्भयम् ॥

End:

एवं यः कुरुते शांतिं न स दोषमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं मातापित्रोश्शिशोर्भवेत् ॥

Colophon :

इति ××××यै व्यतीपातजननशांतिः ॥

896

Sl. No. 12484 व्यतीपातादिजननशांतिः Ms No. P. 5487/75
(यामलीया - शौनकोक्ता)

Beginning :

अथ व्यतीपातजननशांतिविधिरुच्यते—

अथातः संप्रवक्ष्यामि शौनकोऽहं द्विजन्मनाम् ।
वैधृतौ च व्यतीपाते महादोषोऽभिजायते ॥

End:

एवं यः कुरुते मर्त्यो न तु दुःखमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोरपि ॥
सर्वदुःखनिवृत्त्यर्थं सुखी भवति नान्यथा ॥

Colophon :

इति यामलोक्तव्यतीपातजननशांतिः समाप्ता ॥

897

Sl. No. 12485 व्यतीपातादिजननशांतिः Ms. No. P. 5635/81

(नारदप्रोक्ता)

Beginning:

न हि ते अग्न इति सूक्तस्य शुनश्शेफो वरुणस्त्रिष्टुप् याः प्रवत इति वसिष्ठो नद्यो जगती पर्जन्येति सूक्तद्वयस्य वसिष्ठः पर्जन्य आद्यास्तिस्रो गायत्र्यः चतुर्थ्यनुष्टुप् + + + ।

दशपाते चतुर्दश्याममायां पूर्णिमातिथौ ॥

End :

तत्तद्दोषान् विनिर्जित्य दीर्घायुर्जायते नरः ।
पुत्रपौत्रसमृद्धश्च धनधान्ययुतो भवेत् ॥

Colophon:

इति नारदप्रोक्तव्यतीपातादिजननशांतिः ॥

898

Sl. No. 12488 **व्यतीपातादिजननशांतिः** **Ms. No. P. 8000/28**

(शौनकीया– व्यतीपात-वैधृति संक्रांतिजननशांतिः)

Beginning:

× × × × × गन्धपुष्पाक्षतवस्त्रादिभिः प्रपूजयेत् ।

राशौ विनिक्षिपेत् कुम्भं अव्रणं सुदृढं दनम् ।
तीर्थादिकेन सम्पूर्य समशीर्षं सपल्लवम् ॥

End :

तच्दोषशमनार्थाय आचार्याय प्रदापयेत् ।
प्रच्छादनपं दद्यात् ततः शांतित्रयं कुरु ॥

एवं यः कुरुते शांतिं न च दोषमवाप्नुयात् ।
आयुरारोग्यमैश्वर्यं मातापित्रोः शिशोर्भवेत् ॥

Colophon :

इति शौनकीये व्यतीपात-वैधृतिसंक्रांतिजननशांतिः समाप्ता ॥

899

Sl. No. 12492 **व्यतीपातादि जननशांतिः** **Ms. No. P. 10041/9**

(रुद्रयामलीया गौतमं प्रति षडाननप्रोक्ता)

Beginning :

अथातः सम्प्रवक्ष्यामि शृणु गौतमसत्तम ।
वैधृतौ च व्यतीपाते यदि नारी प्रसूयते ।

शोकदुःखभयप्राप्तिविधिनं (?) त्वं च रोगिता ।
मृत्युर्वियोगबन्धत्वं मृतयंमृतपुत्रत्वमेव च (?) ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यत् ब्राह्मणान्भोजयेत्ततः ।
एवं यः कुरुते शांतिं सद्यो दोषापनुत्तये ।।

सर्वदोषविनिर्मुक्तः पुत्रपौत्रसमन्वितः ।
दम्पत्योश्च शिशोश्चैव सौख्यमायुश्च विन्दति ॥

Colophon :

इति रुद्रयामले व्यतीपातजननशांतिः ।।

900

Sl. No. 12495 व्यतीपातादि (जात)प्रथमार्तवशांतिः Ms. No P 604/72

(वृद्धगार्ग्यीया–व्यतीपातादिवैधृतिजातप्रथमार्तवशांतिः)

Beginning :

अथातः सम्प्रवक्ष्यामि शृणु शौनक यत्नतः ।
× × × × × ।।

प्रथमार्तवकाले तु व्यतीपाते तु संभवेत् ।।
स्त्रीणां हि सर्वदुःखं च सर्वनाशो ह वै ध्रुवम् ॥

End :

नित्यकर्म कृतं कृत्वा सर्वदेवनमस्कृतः ।
जन्मान्तरकृतं पापं अस्मिन् जन्मनि यत् कृतम् ॥

तत्सर्वं नाशयाशु त्वं वैधृतोऽसि नमोऽस्तु ते ॥

Colophon :

इति वृद्धगार्ग्योक्ता व्यतीपातवैधृतिजातप्रथमार्तवशांतिः समाप्ता ।।

901

Sl. No. 12496 व्यतीपातादिप्रथमार्तवशांतिः Ms. No. P. 1723/7
(व्यतीपातवैधृतिरजस्वलाशांतिः)

Beginning :

अतः परं प्रवक्ष्यामि शृणु शौनक यत्नतः ।
व्यतीपाते वैधृतिश्चेद्रजोदोषाय कल्पते ॥

प्रथमस्यार्तव × × व्यतीपातस्तु सम्भवेन ।
स्त्रीणां चेत् सर्वदुःखं च सर्वनाशो भवेद्ध्रुवम ॥

End :

आचार्यं पूजयित्वा तु दैवज्ञं च विशेषतः ।
गोदानं वस्त्रदानं च × × दानं विशेषतः ॥

प्रच्छादनपटं दद्यात् तत्र शांतिर्भविष्यति ।
आयुरारोग्यमैश्वर्यं अवैधव्यमवाप्नुयात् ।
सर्वदुःखनिवृत्यर्थं पुत्रपौत्रप्र × × × × ॥

Colophon :

इति शौनकीये व्यतीपातवैधृतिरजस्वलाशांतिः समाप्ता ॥

902

Sl. No. 12497 व्यतीपातादिप्रथमर्तवशांतिः Ms. No. P. 1723/22
(रुद्रयामलीया)

Beginning:

दिवा वा यदि वा रात्रौ व्यतीपातार्तवो यदि ।
तस्य नारी पतिद्वेषी वैधव्यं चानपत्यता ॥

शोकदुःखभयावाप्तिनिर्धनत्वं च रोहितः (?) ।
पतिहीना च वन्ध्या च मृतपुत्रवती तथा ॥

End:

आचार्याय च गां दद्यात् दशदानानि वा ततः ।
ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणानां च भोजनम् ॥

एवं यः कुरुते शांतिं तस्य दोषापनुत्तये ।
गण्डदोषविनिर्मुक्तः पुत्रपौत्रसमन्वितः ॥
वर्धते बान्धवैस्साकं × × महीयते ॥

Colophon :

इति रुद्रयामले व्यतीपातरजस्वलाशांतिः समाप्ता ॥

903

Sl. No 12499 व्यतीपातादिप्रथमार्तवशांतिः (रुद्रयामलीया) Ms. No. P. 3023/26

Beginning :

दिवा वा यदि वा रात्रौ व्यतीपातार्तवं यदि ।
तस्या नार्याः पतिद्वेषः वैधव्यं चानपत्यता ॥

शोकदुःखभया × × निधनत्वं च रोगिता ।
तद्दोषशमनार्थाय शांतिं कुर्यात् विचक्षणः ॥

End :

ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणान् भोजयेत्ततः ।
आचार्यपूजनं कुर्यात् × × × × × ॥

× × यः कुरुते शांतिं तस्य दोषापनुत्तये ॥
गण्डदोषविनिर्मुक्तः पुत्रपौत्रसमन्वितः ॥

Colophon :

इति रुद्रयामले व्यतीपातार्तवशांतिः ॥

904

Sl. No. 12501 व्यतीपातादिप्रथमार्तवशांतिः Ms. No. P. 3804/39

(व्यतीपातवैधृतिप्रथमार्तवशांतिः)

Beginning :

अथातस्संप्रवक्ष्यामि शृणु गौतमसत्तम ।
वैधृतौ च व्यतीपाते यदि नारी रजस्वला ॥
शोकदुःखभयावाप्तिः निर्धनत्वं पतेर्मृतिः ॥

End:

आचार्याय ततो दद्यात् सवस्त्रप्रतिमां च गाम् ।
ऋत्विग्भ्यो दक्षिणां दद्यात् ब्राह्मणांश्चापि भोजयेत् ॥
सर्वदोषविनिर्मुक्तः पुत्रपौत्रधनान्वितः ॥

Colophon:

इति गौतमोक्तवैधृतिव्यतीपातप्रथमार्तवशांतिः समाप्ता ॥

905

Sl. No. 12511 शतताराजननशांतिः Ms. No. P. 5930/106

(शतविशाखनक्षत्रशांतिः)

Beginning:

शततारारात्रौ तदादिदिवसेषु पञ्चदशैकादशेषु दशाहं सप्तदशाहं विंशतिदिनं वा पीडा भवति । अथ होमनक्षत्रदेवताराधनम् ॥

End :

पल्लवोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै धेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वाऽऽशिषो वाचयित्वाऽऽयुरारोग्यं भवति ॥

Colophon

इति शतविशिखानक्षत्रशांतिः ॥

906

Sl. No. 12516 शत्रुशान्तिः (शौनकीया) Ms. No. P. 2914/39

Begining:

शौनकः—

द्विजानां संप्र × मि शत्रुशांतिमनुत्तमम् ।
अष्टम्यां तु चतु र्दश्यां कृष्णपक्षस्य वैधृ × × ॥

× × विक्तशये × × संस्कारान्तं प्रकल्पयेत् ।
उपलेपप्रभृति च यज्ञतन्त्रं यथाविधि ॥

End:

यस्ते मन्यो विधद्वज्रसायकेति सूक्तेनेन्द्रस्तवेन च ।
आचामयीत्युचा दीप्तमुपतिष्ठेद्विभावसुम् ।
ततः स्विष्टकृतादिभ्यो होमशेषं समाचरेत् ॥

दक्षिणां च यथाशक्ति दद्यादित्याह शौनकः ॥

Colophon :

इति शौनकीये शत्रुशांतिः ॥

907

Sl No. 12523 शनिप्रीतिदानविधिः Ms. No. P 604/13

(यामलोक्ता-शनिप्रीतिकरतैलकुम्भदानविधिः)

Beginning :

शनैश्चरं प्रवक्ष्यामि पूजादानादिकं क्रमात् ।
दुःखितानां नराणां च नृपाणां च विशेषतः ॥

वातिकैः पैत्तिकैर्वापि महारोगानुपप्लवैः ।
नानारोगे समुत्पन्ने ग्रहोत्पातादिदर्शने ॥

End :

सर्वारिष्टविनिर्मुक्तः सर्वशत्रुविवर्जितः ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

नीरोगी जायते सद्यः सुखी भवते नान्यथा ॥

Colophon :

इति यामलोक्तशनैश्चरप्रीति-तैलकुम्भदानविधिः ॥

908

Sl. No. 12524 **शनिप्रीतिदानविधिः** **Ms. No. P. 4863/16**

(शनैश्चरप्रीतिकरतैलकुम्भदानविधिः— यामलोक्ता)

Beginning :

शमीपत्रः समभ्यर्च्य कृष्ण××थाक्षतादिभिः ।
धूपं कृ × × गरुं चैव नैवेद्यं कृसरान्नकम् ॥

ततः पुष्पाञ्जलिं कुर्यात् एभिर्नाम पदैः पृथक् ॥

End:

इति दत्वा दक्षिणार्थान् कृष्णधेनुं प्रदापयेत् ।
यस्मात् त्वं पृथिवी सर्वा धेनुर्वै कृष्णसन्निभा ॥

सर्वदेवमयी यस्मात् प्रीतो भव शनैश्चर ॥

Colophon :

इति यामलोक्त-शश्चनैरप्रीति-तैलकुम्भदानविधिः ॥

909

No. 12528 शनिभौमवारजननशांतिः Ms. No. P. 3085/44

(बोधायनोक्ता शनिकुजशांतिः)

Beginning:

भौमश्शान्तिः । शनिश्शान्तिः । अश्वत्थोपनयनं ग्रन्थान्तरे तिष्ठति । मन्दवारशान्ति-भौमवारशान्तिः । गोमयेनोपलिप्य पुण्याहं कुर्वीत । आढकधान्यं तदर्धं तण्डुलं तदर्धं तिलम् ॥

End:

अङ्गारकमन्त्रेण आवाहनादिषोडशोपचारं कृत्वा अङ्गारकमन्त्रेण खादिरेण समिदन्नाज्य-होमाष्टोत्तरशतं जुहुयात् । शेषं शनिशान्तिवत् ॥

Colophon:

बोधायनोक्तशनिकुजशान्तिः ॥

910

Sl. No. 12530 शनिभौमरविवारार्तवशांतिः Ms. No. P. 9965/55

Beginning:

भानुभौमार्कवारेषु यदि पुष्प प्रदर्श्यते ।
व्याधिदुःखी पापवृत्तिः दरिद्राद्यभिचारिणी ॥

तद्दोषशमनार्थाय शांति कुर्याद्यथाविधि ।
गृहस्थश्शनिदिग्भागे गोमयेनोपलिप्य च ॥

End:

अग्निर्मूर्धति मन्त्रेण जपहोमार्चनं तथा ।
नीलवर्णं द्विबाहुं च त्रिशूलं च गदाधरम् ॥

शनिं सदाच गृ ध्रस्थ शन्नो देवीति मन्त्रतः ।
सिन्धुसौगष्टूशाध्वाना (?)मुच्यते दोषवारकम् ॥

Colophon:

इति शनिकुजरविवारऋतुशान्तिः ॥

911

Sl. No. 12531 शनिवारजन्मनक्षत्रशांतिः Ms. No. P. 8532/35

(पुष्कलाचार्यीया)

Beginning :

अथातः सम्प्रवक्ष्यामि शनिशान्तिमनुत्तमम् ।
मन्दवारे तु जन्मर्क्षे योगे व्यधिर्मनोव्यथा ॥

End:

नीलवर्णः सूर्यसुतः शमग्नीरिति पूजयेत् ।
सतो होमं प्रकुर्वीत शमीभिश्चरुसर्पिभिः ॥

Colophon:

-- -- -- --

912

Sl. No. 12532 शनिशांतिः Ms. No. P. 604/5a

(शनैश्चरशांतिः यामलोक्ता)

यथाशनेर्भवेत् पीडा लोकानां भयदायिनी ।
तथा शांतिं प्रकुर्वीत शनिदोषापनुत्तये ॥

गृहस्येशान्यदिग्भागे चतुरश्रं तु मण्डलम् ।
अथ पञ्चाङ्गजःकृते धनुराकारमण्डले ॥

End :

समृद्धिं ददातु तस्माच्छनैश्चरः । पातु यः पुनर्नद्धनाश्वलायनपरितोषितः स्वप्ने × × राज्यं प्रमुखात् तत्प्रसादयेत् ॥

Colophon :

इति यामलोक्तशनिशान्तिः समाप्ता ॥

913

Sl. No. 12533 शनिशांतिः Ms. No. P. 734/24

(शनैश्चरशांतिः– मानवीयसंहितीया)

Beginning :

अथातः सम्प्रवक्ष्यामि शनिशांतिं महामुने ।
गोचारे चाष्टवर्गे वा दशायां विदगा × × ×॥

End

ब्राह्मणान् भोजयेत्पश्चात् स्वयं भुञ्जीत वाग्यत ।
एवं च यः कुरु × × × × × ॥

× × सुबाचा × × न च वन्धुधनक्षयः ।
शनिलोकमवाप्नोति पश्चाद्विष्णुपुरं व्रजेत् ॥

Colophon :

इनि मानवीयसंहितायां शनिशांतिः ॥

914

Sl·No 12535 शनिशांतिः Ms. No· P· 2581/20

(बलहीनशनैश्चरशांतिविधिः–हेमाद्रीया)

Beginning :

अथ बलहीनशनैश्चरशांतिविधिरुच्यते ।

शौनकवाक्यम्—

नवग्रहाणां भूतानां पापानां शनिभौमजौ ।
राहुः केतुश्च सर्वत्र सर्वोपद्रवकारकौ ॥

राशौ वर्षद्वयार्धं च मासार्धं मासमेव च ।
शनिभौमौ राहुकेतू × × × × इकारकौ ॥

End

आयुरारोग्यमैश्वर्यं लभते नात्र संशयः ।
ब्राह्मणान् भोजयेद्भक्त्या तेभ्यो दद्याच्च दक्षिणाम् ॥

बन्धुभिः सह भुञ्जीत गृह्णीयात् ब्राह्मणाशिषः ।
शनिदोषं विनिर्जित्य सर्वान् कामानवाप्नुयात् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे शांतिप्रकारणे शनिशांतिः समाप्ताः ॥

915

Sl. No. 12543 शनिशांतिः Ms No. P. 5635/88
(सारावलीया)

Beginning :

यदा भवेच्छनेः पीडा लोकानां भयदायिनः ।
तदा शांतिं प्रकुर्वीत शनिदोषापनुत्तये ॥

पूर्ववत्कल्पिते देशे काले येनोक्षिते ततः ॥

End :

तस्य तुष्टिं शनिंदद्यात् मनःप्रीतिं सुखं वहन् ।
शनिवारे प्रकर्तव्या शांतिरेषा महत्तरा ॥

Colophon:

इति सारावल्यां शनैश्चरशांतिः ।

916

Sl. No. 12562 शनैश्चरप्रतिमादानविधिः Ms. No. P. 9428/57

Beginning :

अथ शनश्चरप्रतिमादानम् —

मम जन्मराश्यपेक्षया अष्टमराशौ वर्तमानशनैश्चरग्रहेण सुचितमना × × × × सकलाभीष्टफलावाप्ति कामयमानः ब्रह्मयामलोक्तप्रकारेण तैलपूर्ण ·|· + + + शनैश्चरप्रतिमादानं करिष्ये ॥

End :

अहं इमां तैलपूर्णे कांस्यपात्रस्थितां षोडशोपचारार्चितां आयसशनैश्चरप्रतिमां मम पूर्वोक्तफलकामः तुभ्यमहं सम्प्रददे नममेति दक्षिणां च दद्यात् । यस्य स्मृत्येत्यादि ॥

Colophon :

इति शनैश्चरप्रतिमादानम् ॥

917

Sl. No. 12563 शनैश्चरप्रतिमादानविधिः Ms. No. P. 9254/6

(यामलोक्ता)

Beginning:

शनेस्तु सम्प्रदास्यामि पूजादानादिकं क्रमात् ।
दुःखितानां नराणां च नृपाणां च विशेषतः ॥

वातिके पैत्तिके वापि महारोगाद्युपप्लुते ।
राष्ट्रक्षोभे च दुर्भिक्षे सङ्करे जनमारणे ॥

End :

एवं यः कुरुते सद्यः शनिदोषविवर्जितः ।
निरोगी जायते सद्यः सुखी भवतु नान्यथा ॥

सर्वानिष्टविनिर्मुक्तः सर्वशत्रुविवर्जितः ।
सर्वान् कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति यामलोक्तशनैश्चरप्रीतिनलकुम्भदानविधिः ॥

918

Sl. No. 12565 **शनैश्चरमन्त्रजपसङ्कल्पः** Ms. No. P. 4157/9

Beginning :

एवंगुणविशेषणविशिष्टायां शुभतिथौ यजमानस्य सकुटुम्बानां क्षेमस्थैर्यविजयायुरारोग्यै-श्वर्याभिवृध्यर्थं समस्तमङ्गलावाप्त्यर्थं समस्ताभ्युदयार्थं च ÷ + ÷ यजमानस्य आदित्यादीनां नवानां गृहाणां + आनुकूल्यसिध्यर्थं– ॥

End :

राजप्रसादसिध्यर्थं धनकनकवस्तुवाहनसमृध्यर्थं श्रीशनिग्रहमुद्दिश्य शनिग्रहप्रीत्यर्थं शनैश्चरजपं करिष्ये ॥

Colophon :

– – –

919

Sl. No. 12566 **शन्यातिथ्यविधिः** Ms. No. P. 3023/168

Beginning :

× ×राश्युपरि वाहणं × × × × × × संपूज्य, तस्य पश्चिमदिग्भागे तण्डुलेन स्थण्डिलं कृत्वा दशपद्मं विलिख्य,- ॥

End:

यस्मात्त्वं पृथिवी सर्वा धेनुवक्लिष्टस × × × ।
सर्वमृत्युहरा नित्यं अतश्शांति प्रयच्छ मे ॥

Colophon

इति × × × ले कल्पे शन्यातिथ्य × × × सम्पूर्णम् ॥

920

Sl. No. 12567 शनिदानपद्धतिः (यामलोक्ता) Ms. No. P. 9428/124

Beginning :

रचनाप्रकारः—

असाध्यकलिग्रस्ते समये प्राणसंशये भानुभौमशनिवारे व्यतीपात-वैधृति-अष्टमी-चतुर्दशी-कष्टदिनेषु ·/· + + ·/· शशिपूजां करिष्ये ॥

End

गोदान-वस्त्रदान-तिलदानअयःपिण्डदान-कार्पासदान-कृन्रवमदानानि कुर्यात् । एतेषां यथाशक्ति दक्षिणां दद्यात् । तदनन्तरं फलदानताम्बूलदानं कुर्यात् । यस्येत्यादि ॥

Colophon :

इति यामलोक्तप्रकारेण शनिदानपध्दतिः ॥

921

Sl. No. 12568 शांतिकलशस्थापनाविधिः Ms. No. P. 1299/33

Beginning :

स्योना पृथिवि भवानृक्षरा निवेशनी । यच्छानश्शर्म सप्रथाः । येन तोकाय तनायय धान्यां वीजं वहद्भमक्षितम ॥

End :

या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
मनैनु बभ्रूणामहं शतं धामानि सप्त च ॥

बृहस्पते प्रति मे देवतामिहि ।
युवं वस्त्राणि याः फलिनीर्या ॥

Colophon

– – – –

922

Sl.No 12572 **शांतिकलशस्थापनविधिः** Ms. No P. 8532/87

(अष्टोत्तरशतकलशस्नानविधिः)

Beginning :

शतकुम्भोदकस्नानविधिं वक्ष्ये मुनीश्वर ।
शृणुश्व सावधानेन पूर्वोक्तां ब्रह्मणः शुभाम् ॥

यो जीवति सहस्रं च मासानां सुसमास्थितः ।
तस्य कार्यं सुतादिभ्यो अभिषेकं शुभावहम् ॥

End :

एवं कृते तु पुत्रेण अभिषेकं विधानतः ।
दीर्घायुष्यमवाप्नोति धनधान्यं च विन्दति ॥

इह लोके सुखी भूत्वा पुत्रपौत्रैः समावृतः ।
ततो मोक्षमवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति शौनकीये अष्टोत्तरशतकलशस्नानविधिः ॥

923

Sl. No 12576 **शांतिकलशाभिषेकविधिः** Ms. No. P. 2914/38

(अलक्ष्मीहरकुम्भाभिषेचनविधिः – यामलोक्तः)

Beginning :

अलक्ष्मीहरकुम्भाभिषेकं तु कमलासनः ।
श्रीमतां च नृपाणां च बालानां राजयोषिताम् ॥

× × × × × यूनां चैव विशेषतः ।
दुर्लक्षणसुखाये गादलक्ष्मीग्रहणं तथा ॥

End :

कटकं दक्षिणां दद्यादङ्गुलीयकमे ×××× ।
×××××स्त्रं कण्ठसूत्रं सकंचुकम् ॥
गन्धपुष्पाक्षता× × × त्सुमृष्टभोजनम् ।
पुत्रपौत्रधनैर्यु × × भू × मां स्यान्न संशयः ॥

Colophon :

इति यामलोक्त × × × × माभिषेचनविधिः ॥

924

Sl. No 12580 शान्तिकल्पविधिः Ms. No. P. 251/2

Beginning :

अथातः शान्तिकल्पविधिं व्याख्यास्यामः—

पुण्याहे दम्पत्योः चन्द्रतारावलान्विते पूर्वाह्णे दम्पती मङ्गलस्नातौ भूत्वा पुण्याहं वाचयित्वा प्राणानायम्य तस्य पत्नी दुष्टनक्षत्रे चरणे वारे तिथौ प्रथमरजस्वलासती । ÷ + ÷ तद्दोषनिवृत्त्यर्थं कल्पोक्तप्रकारेण महाशान्तिं आचरिष्ये; इति संकल्पः ॥

End:

उपविश्य ऋत्विग्भ्यः आचार्याय कलशवस्त्रप्रतिमादिकं दत्वा , आचार्याय गां दत्वा, ब्रह्मणे दक्षिणां दत्त्वा, दशदानानि दद्यात् । इतरेभ्यो दक्षिणां दत्त्वा पंगु-दीनअन्ध-कृपण-जडादीन् संतर्प्य शतं पञ्चाशत् पञ्चविंशतिर्वा ब्राह्मणान् भोजयेदित्याह भगवानापस्तम्बः ॥

Colophon :

— — — —

925

Sl. No. 12581 **शांतिकल्पविधिः** Ms. No. P. 4223
(हैमाद्रीयः)

Beginning :

शौनकः काश्यपो वत्सः वसिष्ठो यश्च नारदः ।
पितामहो व्यासश्च याज्ञवल्क्य × × ॥

× × श्च दक्षश्च शङ्खश्चाङ्गिरसस्तथा ।
आपस्तम्बोऽप्यगस्त्यश्च भरद्वाजो मनुस्तथा ॥

End :

धर्मशास्त्रप्रयुक्तं च प्रायश्चित्तमनुत्तमम् ।
सर्वारिष्ठविनाशाय × × × × × ॥

अथातः सम्प्रवक्ष्यामि ग्रहारिष्टप्रशान्तये ।
आदित्यभौम + + + + + + + ॥

एवं यः कुरुते भक्त्या तस्य दोषस्य शान्तये ।
दम्पत्योः सुखसं × × जीवेद्वर्षशतं नरः ॥

Colophon :

इति हेमाद्रौ मघानक्षत्ररजस्वलाशान्तिः ॥

926

Sl. No. 12584 **शांतिकुण्डलक्षणम्** Ms. No. P. 2579/11

Beginning :

गृहस्य पूर्वदिग्भागे . . . र . . . . मथा . . वा ।
.कुण्डं कुर्याद्विधानेन यथा वर्णक्रमेण तु ॥

. . . ध्दं हस्तमालं च आ . . . . . मन्त्र - गे ।
ब्राह्मणानां भवेत्कुण्डं चतुरंगुलसंमितम् ॥

End :

क्षत्रियाणां त्र्यंगुलं तु विशां . . . . ।
एकाङ्गलिस्तु शूद्राणं . . . . . रेखामात्रकम् ॥
कुण्डं कुर्यात्प्रयत्नेन आपो . . . . . . ॥
+ + + + ।
प्रकुर्यात्सुसमं रम्यं प्रकुर्वीत विचक्षणः ॥

Colophon:

— — — —

927

Sl. No. 12586 शांतिकुण्डलक्षणम् Ms. No. P. 4863/105

Beginning :

कुण्डलक्षणमाह तत्र प्रतिमालक्षणं—

निष्कार्धं वा यवाद्यष्टानुवर्णेन यततः ।
प्रतिमायाः प्रमाणं तु त्रिभिः स्वर्णैः फलेन वा ॥
तदभावे तदर्धं वा कुर्यात्तत्पादमेव वा ॥

End :

मण्टपे वा गृहे वापि पूजां सद्यः प्रकल्पयेत् ।
चतुरश्र मण्डपं च तण्डुलेन विचक्षणः ॥

Colophon :

— — — —

928

Sl. No. 12590 शांतिदानमन्त्राः Ms No. P. 1218

Beginning :

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मात् दानेन चानेन माधवः प्रीयतां सदा ॥

End :

एवमुच्चार्य दानानि ब्राह्मणाय प्रदाय च ।
पूतो भवति तस्माच्च लभते पौष्टिकं शुभम् ॥

Colophon :

– – – –

829

Sl. No. 12591 शांतिदानमन्त्राः Ms. No. P. 1 419/2

Beginning :

सरस्वति नमस्तुभ्यं जगद्व्यापनकारिणि ।
प्रयच्छ मेधां मे नित्यं देवदेवि नमोस्तु ते ॥

End :

एवमुच्चार्य दाना × × × प्रदाय तु ।
सर्वापद्भ्यो विमुक्तस्सन् लभते श्रियमात्मनः ॥

Colophon :

– – – –

930

Sl. No. 12592 शांतिदानमन्त्राः Ms. No. P. 2268/32

लक्ष्मीयुतश्रीगरुडदानम् –

वनतेय नमस्तुभ्यं धरणीधरवाहन ।
बलारोग्यं चिरायुश्च कीर्तिञ्च कुरु मे प्रभो ॥

दासीदानम्–

धर्मार्थकाममोक्षाणां फलानि विविधानि च ।
दत्वा दासीं प्रदास्यामि . . . -जच्छतु मे शिवम् ॥

End :

पुस्तकदानम्–

सरस्वति नमस्तुभ्यं यगद्व्यापककारिणि ।
पु × × × × × मेधां प्रयच्छ मे ॥

दर्पणदानम्-

दर्शनं तु प्रदास्यामि म . . . . स्वस्म . . ॥

Colophon :

-- -- --

931

Sl. No 12593 शांतिदानमन्त्राः Ms. No. P. 2282 7

Beginning:

अथ दानमन्त्राः । आढकदानम् —

आढकास्सर्वबीजाढ्याः सर्वकामफलप्रदाः ।
दास्येऽहं भौमसम्प्रीत्यै रोगोपहतिशांतये ॥

माषदानम्—

माषाः बीजोत्तमाः पुण्याः सर्वदानफलप्रदाः ।
दास्यामि रोगशांत्यर्थं प्रीतिं यच्छतु मे सदा

End:

कार्पासदानम्—

कार्पासं मृत्युदैवत्यं मृत्युप्रीतिकरं सदा ।
सर्वरोगहरं नित्यं अतश्शांतिं प्रयच्छ मे ॥

Colophon :

— — — —

932

Sl. No. 12594 शांतिदानमन्त्राः Ms. No. P. 2584/18

Beginning :

एष धर्मधिये दत्तः ब्रह्मविष्णुशिवात्मकः ।
शीतलोदकसम्पूर्णः मम सन्तु जयैषिणः ॥

छत्रम्—

छत्रं वर्षातपत्राणं सुखदं सर्वदेहिनम् ।
. . . . . . माज्यमाहारमतश्शांतिं प्रयच्छ मे ॥

End :

धेनुः—

यस्यायं पृथिवी सर्वा धेनो वै कृष्णसन्निभे ।
सर्वपापहरा. नित्यं अतः शान्तिं प्रयच्छ मे ॥

Colophon :

— — — —

933

Sl. No. 12595 शांतिदानमन्त्राः Ms. No. P. 2885

Beginning :

एवंगुणेत्यादि । मम इह जन्मनि जन्मान्तरेषु + + + + कृतानां सर्वेष पापानां निवृत्तिं + + ·|· सकलाभीष्टफलप्रदायकश्रीवराहरूपकृष्णप्रीतिं च कामयमानः भविष्योत्तरपुराणोक्तप्रकारेण + + ·|· यथाशक्ति भूमिदानं करिष्ये । ·|· ·|· ·|·

दानमन्त्रः—

सर्वसस्याश्रया भूमिः वराहेण समुद्धृता ।
अनन्तसर्वफलदा ह्यतःशान्तिं प्रयच्छ मे ॥

End :

एवमुच्चार्य तत्सर्वं ब्राह्मणाय निवेदयेत् ।
यावज्जीवकृतं पापं तत्क्षणादेव नश्यति ॥

Colophon :

इति यामलोक्तप्रकारेण तिलराशिदानविधिः ॥

Extra information:

ग्रन्थेऽस्मिन् भूहिरण्यादिदानमन्त्राण्यारभ्य अग्निमान्द्यहरवैश्वानरदानतिलराशिदानपर्यन्ताः २३५ दानवैशिष्ट्यमन्त्राः वर्तन्ते । एते च मन्त्राः यामल भविष्योत्तरपुराणादिरगृहीताः ॥

934

Sl No. 12596 शांतिदानमन्त्राः Ms. No. P. 3266/2

Beginning:

गोदानम्—

यज्ञे साधनभूताय विश्वस्याघप्रणाशिनि ।
विश्वरूपधरो देवः प्रीयतां अनया गवे ॥

भूदानम्—

सर्वसस्याश्रया भूमिः वराहेण समुद्धृता ।
अनन्तपुण्यफलदा अतश्शांतिं प्रयच्छ मे ॥

End:

शूर्पदानम्—

शूर्पसम्पुटमध्यस्थं सर्वोपस्करसंयुतम् ।
तस्मादस्याः प्रदानेन अतश्शांतिं प्रयच्छ मे ॥

Colophon :

— — — —

935

Sl. No. 12597 शांतिदानमन्त्राः Ms No. P. 3804/25

Beginning :

प्रसीदतु भवो नित्यं कृत्तिवासा महेश्वरः ।
पार्वत्या सहितो देवः जगदुत्पत्तिकारकः ॥
× × × शक्त्यात्मकं यस्मात् जगदेतच्चराचरम् ।
तस्मा × × × × × करोतु तव वाञ्छितम् ॥

End :

योऽसो पाशधरो देवः वरुणश्च ... लेश्वरः ।
नक्रवाहः प्रचेताश्च ज्येष्ठा × × व्यपोहतु ॥

वरुणप्रतिमादानम् ॥

Colophon :

४७ तमे पत्रे-
इति शिवलिगद नम ॥

936

Sl. No. 12598 शांतिदानमन्त्राः Ms. No. P. 3524/10

Beginning :

अनेन फलदानेन तुष्टो भवति चेश्वरः ।
तस्मादस्य प्रदानेन अतशान्ति प्रयच्छ मे ॥

End :

दर्पणं तु प्रदास्यामि शिवं यच्छतु मे हरिः ।
तस्मादस्य प्रदानेन अतश्शांति प्रयच्छ मे ॥

Colophon

– – – –

937

Sl. No. 12603 शांतिदानमन्त्राः Ms. No. P. 56712

Beginning :

कूष्माण्डं बहुबीजानि ब्रह्मणे निर्मितं पुरा ।
ब्रह्महत्यादिपापघ्नं अतः शान्ति प्रयच्छ मे ॥

End :

मेध्यमेध्यविभागाग्रे देवी लक्ष्मी सरस्वती ।
उपवीतं तु विच्छिन्नं सन्तनोत्तु व्रतं मम ॥

Colophon:

– – – –

938

Sl No. 12604 शान्तिदानमन्त्राः Ms. No. P. 5930/6

Beginning :

स्वर्णयुक्तं कांस्यपात्रं गोघृतेत सुपूरितम् ।
तस्यावलोकनं कृत्वा ब्राह्मणाय निवेदयेत् ॥

देवदेव सुरश्रेष्ठ त्वमेव भगवान् हरिः ।
अवेक्ष्य राज्यं सु . . . . . कुरु श्रे़ष्ठ कुरुष्व माम् ॥

आज्यपुष्पाञ्जलिमन्त्रः—

रूपरूप प्रतिरूपो वभूव तदस्य रूपं प्रतिचक्ष × × य ।
इन्द्रोमापतिः पुरुरूपे श्रयेते युक्ताह्यस्य हरयः दाताददा ॥

End :

आचार्यस्सुतिलैर्होमं कुर्यादष्टोत्तरं शतम् ।
के गणानां त्वे।त मन्त्रेण तथैवाज्यहुतीः क्रमात् ॥

Colophon:

– – – – – –

939

Sl. No. 12606 शांतिदानमन्त्राः Ms. No. P. 6866/42

Beginning :

ಶಾಂತಿದಾನಮಂತ್ರ್ರಾಃ । ಕುಂಡಲ

क्षीरोदमथनोद्भूतमुज्वलं कुण्डलद्वयम् ।
श्रिया सह समायुक्तं द × × × × ॥

× × × × × × × × × × × ।
× × × × × × × × × × × ॥

× × × × × × × × चांगुळीयकम् ।
धर्मप्रदं प्रदास्यामि प्रीणातु कमलापतिः ॥

End:

आदित्यतेज × × × × × तम् ।
श्रेयसे मम विप्र त्वं प्रतीच्छ पूपमुत्तमम् ॥

ದೀಪ ಹರಿದ್ರಾ

लक्ष्म्या धात्रया च लक्ष्मी च श्रीश्च ।
× × × × × × × × × × ॥

Colophon :

– – – – –

940

Sl. No. 12609 शान्तिदानमन्त्राः Ms. No. P. 8532/55

Begining:

दानमन्त्राणि । ಕುಂಡಲ—

क्षीरोदमथनोद्भूतमुज्वलं कुण्डलद्वयम् ।
श्रिया सह समायुक्तं ददे श्रीः प्रीयतां मम ॥

End :

गोपुच्छे तु करे कन्या दासी केशे हयश्रुतौ ।
वृषस्कन्धे गृहस्तम्भे गजा दन्ते अजस्तनौ ॥
शेषाणि सर्वदानानि विप्रहस्ते प्रदापयेत् ।

Colophon :

– – – –

941

Sl. No. 12613 शांतिदानमन्त्राः Ms. No. P. 9294/11

Beginning :

ಫಲದಾನ—

फलदानमिदं श्रेष्ठं कूष्मा . . . . पुत्रदायकम् ।
य इदं बहुबीजाढ्यं अतश्शांतिं प्रयच्छ मे ॥

End :

ಚಕ್ರದಾನ—

सर्वकान्तिप्रदं चैव सर्वलोकहिते रतम् ।
पञ्चनिष्कः प्रमाणेन च दापयेत् ॥

Colophon :

-- -- --

942

Sl. No. 12614 शान्तिदानमन्त्राः Ms. No. P. 9379/69

Beginning :

गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।
तस्मादस्य प्रदानेन अतश्शान्तिं प्रयच्छ मे ॥

End :

पद्मवासे हरेर्नाभिजात मां पाहि सर्वदा ।

तुलसीदानम् ॥ ४० ॥

मणिकाञ्चनपुष्पाणि मणिमुक्तामयानि तु ॥

Colophon:

- - -

943

Sl. No. 12616 शांतिदानमन्त्राः Ms. No. C. 3424/28

(दानद्रव्यविवरणम्)

Beginning:

गोदान– गौः । गवामङ्गेषु तिष्ठन्ति भुवनानि चतुर्दश ।

लिङ्गदान– लिङ्गम् । कैलासवासा गौरीशः ।

दीपदान– दीपम् । अज्ञाननाशनं दीपः ।

छत्रं– । छत्रं वर्षातपत्राणम् ।।

End

ಪಂಚಾಮೃತ- त्रिलोकनाथ देवेश ।

ಸುವರ್ಣ- हिरण्यगर्भगर्भस्थम् ।

\+ + + + ।

ಚಿನ್ನದಮಲ್ಲಿಗೆ— दासी-दासौ

ಚಿನ್ನದಸಂಪಿಗೆ— दास्यं

\+ + + +

ಚಂಗೋಲ— गीतम् ।

२ ¶.... ನಗಲ ವ್ರತೋದ್ದಿಶ್ಯ ಬಟ್ಟಲು ॥

Colophon :

-- -- -- --

944

Sl. No. 12617 शांतिदानमन्त्राः Ms. No. C. 3497/2

Beginning :

इन्दुवन्निर्मलाः शुद्धाः क्षेमदा दधितण्डुलाः ।

दधितण्डुलदानेन माधवः प्रीयतां सदा ॥

छत्रं वर्षातपत्राणां सुखदं सर्वदेहिनाम् ।
तस्मादस्य प्रदानेन माधवः प्रीयतां सदा ।।

End :

अशून्यशयनं नित्यं अनूनं श्रियमुन्नतिम् ।
सौभाग्यं देहि मे नित्यं शय्या दानेन केशव ।।

Colophon :

— — —

Extra information:

यं पालयसि धर्मं त्वं धृत्या च नियमेन च ।
स वै राघवशार्दूल धर्मस्त्वामभिरक्षतु ।।

इति ग्रन्थान्ते श्लोक एकः दृश्यते ।।

945

Sl. No. 12617 शांतिबलिः Ms. No. P. 604/52

(सर्वज्वरनिवारणम्)

Beginning :

बलिं कर्म प्रवक्ष्यामि सर्वज्वरनिवारणम् ।
यस्मिन् स्मृते ज्वरात् मुक्तः जंतोर्जीवविनिश्चयः ।।
त्रिपादं त्रिशिरस्कं च त्रिहस्तं च त्रिलोचनम् ।
स्वर्णेन राजतेनापि पिष्टचूर्णेन वा पुनः ।।
ज्वररूपं निर्मायाथ स्थापयेद्भाजने पुनः ।।

End:

दानमन्त्रः-- भस्मायुधाय विद्महे तीक्ष्णदंष्ट्राय धीमहि । तन्नो ज्वरः प्रचोदयात् ।।

Colophon :

इति सर्वज्वरबलिशान्तिः ।।

946

Sl. No. 12620 शांतिबलिदानविधिः Ms. No. P. 9167/33

Beginning :

चरुमन्नमा × × य आपो गृहीत्वा, शं नो वातः पवतां, इति कारयित्वा मोक्ष ते इन्द्र दिग्भागे विद्यमानेभ्योन्न तेभ्यः इमं × × × ददामि ।।

End :

बलिं गृहीत्वा विधिवत्प्रयुक्तं
वा × × × परिकल्पयन्ति ।
न × × × × ।
× × तेभ्यः सकलं गृहेभ्यः ।।

इति दिग्देवताः प्रार्थयेत् ।।

Colophon :

– – – –

947

Sl. No. 12621 शांतिरत्नम् Ms. No. C. 2823/4

Beginning :

सुवर्णदानदक्षिणात्वेन व × × स्वे दत्वा न ममेति वदेत् । ओं स्वस्तीति वरः । ततो दाता जलभाजनभोजनगोमहिष्यादि + + + दद्यात् ।
तत्र मन्त्रः–

यज्ञसाधनभूतायाः विश्वस्याघप्रणाशिनी ।
विश्वरूपधरो देवः प्रीयतामनया गवा ।।

End :

ततः कर्ता मातुः पुरस्तात्पश्चाद्वाग्नेरनु . . . गोमय - - - ततो एकविंशति - - दाय मातुर्दक्षिणतस्तिष्ठेत् । ततः कुमारेणान्वार - - - - - - - ॥

Colophon :

– – –

948

Sl. No. 12622 शांतिरत्नम् Ms. No. C. 3946

(शतचण्डीसहस्रचण्डीहवनपद्धतिः)

Beginning :

आदौ प्रणवमुच्चार्य व्याहृतिप्रणवादिकम् ।
बीजं मन्त्रं समुच्चार्य मन्त्रान्ते बीजमाचरेत् ॥ १॥

अथ शतचण्डी-सहस्रचण्डीप्रयोगः—

नत्वा गणेश्वरं देवं पितरौ राघवं शिवम् ।
रामकृष्णतनूजेन कमलाकरशर्मणः ॥ + + +

सहस्रं चण्डिकायाश्च शतचण्ड्यास्तथैव च ।
नवार्णन्यासविधिना प्रयोगः प्रोच्यतेऽधुना ॥

तत्र यजमानः + + गणेशकूर्मवसुधानां पूजनं कृत्वा + + पूर्वोक्तदेवतानां पूजनं च कृत्वा + जानुभ्यामवनिं गत्वा—

आगच्छ सर्वकल्याणि वसुधे लोकधारिणि ।
उद्धृतासि वराहेण सशैलवनकानना ॥

End :

सुहृद्युक्तो भुञ्जीत । इयमेव पूजाहोमबल्यादिविधानं नवरात्रे ज्ञेयम् । विशेषस्तु मत्कृते निर्णयसिन्धौ नवरात्रनिर्णये ज्ञेयः ॥

योऽत्र भाट्टतन्त्रगहनार्णवकर्णधारः
शास्त्रान्तरेषु निखिलेष्वपि मर्मभेत्ता ।
योऽत्र श्रमः किल कृतःकमलाकरेण
प्रीतोऽधुनास्तु सुकृती बुधरामकृष्णः ॥

Colophon :

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणरामेश्वरभट्टसूरिसूनुनारायणभट्टसुतमीमांसकराम कृष्णभट्टात्मजकमलाकरकृतशान्तिरत्ने शतचण्डीसहस्रचण्डीविधिः ॥

949

Sl. No 12624 शान्तिसारः Ms. No. C. 2735/1
(नृसिंहप्रसादः)

Beginning :

द्वारा श्रेष्ठी .... भावया भवेत् ।
शुभाहे दैर्घ्यविस्तारं मित्वा बन्धं समाचरेत् ॥
त्रिपञ्चस्वाष्टपर्यंतश्रेष्ठो बन्धः प्रकीर्तितः ।
+ + + + + + + ॥
प्रारम्भादौ महापूजां श्येनकानपि कारयेत् ।
वारुणं नागदेवं तु नाग........यन् सह ॥

End:

अथ द्वादशे मासि गर्भिण्या गर्भनिमित्तानि चेद्रोदनोत्पद्यते तदा बलिदा- ॥

Colophon :

४ तमे पत्रे

इति श्रीमल्लक्ष्मीनृसिंह चरणयुगळसरोरुहभ्रमर-सकलभूमण्डलमण्डन-समस्तयवनाधीश्वरनिज--ा मशाहसमस्तसाम्राज्यधुरंधरश्रीमन्महाराजाधिराजविरचिते नृसिंहप्रसादे शांतिसारे नारीणां सुख प्रसवोपायः ॥

950

Sl. No. 12625 शांतिसारः Ms. No. C. 2853

Beginning :

श्रीरामकृष्णपितरं नत्वोमाम्बां सदाशिवं रामम् ।
दिनकरशर्मा तनुते शान्तिकसारं सुखाय विबुधानाम् ॥ १ ॥
ग्रन्थेस्मिन् शान्तिसाराख्ये यथार्था ये निरूपिताः ।
तेषामादौ सुबोधाय क्रियतेऽनुक्रमस्स्फुटः ॥ २ ॥
कथितोऽयुतहोमोऽत्र लक्षहोमस्ततः परम् ।
कोटिहोमस्तस्य चोक्ता भेदाश्शतमखादयः ॥ ३ ॥

End:

पूजयित्वा हरं दुर्गां ग्रहान् मातृविनायकान् ।
प्रसादोक्तविधानेन बलिं दत्वा पुरं कुरु ॥

श्रीरामेश्वरसूरिसूनुरुदभूद्यो भट्टनारायणः
क्षोणीपण्डितमानखण्डनजयी श्रीरामकृष्णस्सुतः ।
मीमांसानयतत्त्ववित् दिनकरस्तस्मादभूत्तत्कृतिः
सेयं शांतिकतन्त्रसारविषया रामाय दद्यात्सुखम् ॥

Colophon :

इति श्रीमद्रामेश्वरसूरिसूनु-श्रीमन्नारायणसुत-श्रीमद्रामकृष्णात्मज-दिनकरभट्टकृते शांतिसारः सम्पूर्णः ॥

951

No. 12630 शांतिसारानुक्रमणिका: Ms. No. C. 3858/1

Beginning:

१) मङ्गलम् ।
२) नवग्रहमखः ।
३) अथायुतहोमविधिः ।
४) वेदीलक्षणम् ।
५) नवग्रहाः ।
६) ग्रहाणां वर्णाः ॥

End :

२४६) अथ पर्जन्यजपशांतिः ।	२४९) अथाभिषेकन्त्राः ।
२४७) अथ राजाभिषेकः ।	२५०) अथ पुष्पाभिषेकः ।
२४८) अथ विष्णुधर्मोक्तराजाभिषेकः ।	२५१) अथ दुर्गविधिः ॥

Colophon :

इति शातिसारानुक्रमणिका समाप्ता ॥

952

Sl.No 12632 शांतिसारावळ्यनुक्रमणिका Ms. No. P. 8134/9

Beginning :

ग्रहार्घ्यमन्त्राः । कुहूयोगरजस्वलोत्पातशांतिः ।
ग्रहप्रार्थना । व्यतीपातवैधृतिरजस्वलाशांतिः ।
ग्रहदानानि । प्रथमरजस्वलाविधिशांतिः ।
शनैश्चरव्रतम् । उपरि दन्तजननशांतिः ।
मन्त्रस्नानम् । शिथिलीशांतिः ।
ग्रहयोगकल्पः ।दन्तजननशांति ॥

End :

अपामार्जनम् ।
नवग्रहस्तोत्रम् । + +
उपहोमाः ।
दानमन्त्राः ॥

Colophon:

- - - -

953

Sl. No 12633 शांतिहोमविधिः Ms. No. P. 4984/58

(ईश्वरसंहितीया)

Beginning :

अथातस्संप्रवक्ष्यामि शांतिहोमविधिक्रमम् ।
प्रायश्चित्तेषु सर्वेषु प्रतिष्ठादौ विशेषतः ॥ + +

प्रासादे मण्डपे वापि पचनालय एव वा ।
एकहस्तप्रमाणे तु कुण्डे वा स्थंडिलेऽपि वा ॥

End :

शान्त्यादिदेवतास्तास्तु मूलबेरे समर्पयेत् ।
ब्राह्मणान् भोजयेत्पश्चात् यथाशक्ति च दक्षिणाम् ॥

Colophon :

इति श्रीपाञ्चरात्रे महोपनिषदि ईश्वरसंहितायां शांतिहोमविधिर्नाम द्वादशोऽध्यायः ॥

954

Sl. No. 12636 शान्त्यङ्गशतमूलनामानि (शौनकीयानि) Ms. No. P. 4720/10

Begining:

अथ शतमूलनामान्याह शौनकः—

मूलानामथ नामानि प्रवक्ष्याम्यानुपूर्वशः ।
काश्मर्यमूलं प्रथमं सहदेव्यास्तदन्तरम् ॥

अपराजितमृक्षं च कुळीरं करवीरजम् ।
अधोमुखी शङ्खपुष्पी यष्टी मधुककोष्ठिकम् ॥

End:

तदभावे विष्णुक्रान्ता सहदेवी तुलसी तु दशावरी ।
मूलनामानि गृह्णीयात् शतालाभे विशेषतः ॥

Colophon :

इति शौनकोक्तानि शतमूलनामानि समाप्तानि ॥

955

Sl. No. 12637 शांत्यनुक्रमणिका Ms. No. P. 9254/1

Beginning :

ಶಾಂತಿವಿಷಯಾನುಕ್ರಮಣಿಕೆ-

अवेक्षिताज्यदानम् ।

कदलीफलदानम् ।

वास्तुपूजाविधिः ॥

End :

ऋतुनक्षत्रशान्तयः । + +

उदकशान्तिः ।

वनभोजनविधिः ॥

Colophon :

- - - - -

Colophon:

956

Sl. No. 12648 शालादानविधिः Ms. No. P. 9880/18

Beginning :

पूर्वोक्त + + तिथौ मम पापक्षयार्थं + + उमारूपिणीं.........कूष्माण्डपूज + + + स्नात्वाचम्य,

क्षमा सत्यं दया दानं शौचमिन्द्रियनिग्रहः ।

सर्वव्रतेष्वयं धर्मः .... ॥

इति संक्रमणांगसूयप्रीतये + + पुरुषार्थसिध्यर्थं शालादानमहं करिष्ये संप्रददे न मम ॥

End:

वस्त्राभरणालंकारान् आचार्याय दत्वा शालां भूरीन् महाजनान् दापयेत् । अनेकं शतम । इन्द्रोग्नि.........कर्तृम्तां ? ।

Colophon :

— .. — ..

957

Sl. No. 12639 शिथिलीशांतिकल्पः Ms. No. P. 2914/21

(बोधायनोक्तः)

Beginning :

शान्तिप्रकारं वक्ष्यामि बोधायनमतेन वै ।
....शान्तिरूपं कारयेच्च स्वशक्तितः ॥

स्थूलवृत्तमुखं दृष्टं षट्पदं दंष्ट्रया युतं ।
कृशमध्यं मृत्युमुखं शिथिलींरूपमुत्तमम् ॥

End :

अयः पिण्डादीनि दद्यात् ।

पायसापूपमृष्टान्नं सवस्त्रं भोजयेद्द्विजान् ।
शिथिलीं भोजयेत भक्त्या वित्तशाठ्यविवर्जितः ।
आयुरारोग्यवृध्यर्थं यजमानस्य कारयेत् ॥

Colophon :

इति बोधायनोक्तशिथिलीशांतिकल्पः ॥

958

Sl. No. 12643 शिथिलीशांतिकल्पः (शौनकीयः) Ms. No. P. 4720/31

Beginning

अथ शिथिलीशांतिः—

शौनकोऽहं प्रवक्ष्यामि शिथिलीशांतिमुत्तमम् ।
आयुर्वृद्धिकरं नृणां अपमृत्युविनाशनम् ॥

End:

ब्राह्मणैराशिषो भूत्वा बन्धुभिस्सह वन्दनैः ।
एवं कृते न सन्देहः न दोषशिशथिलीभवः ॥

Colophon:

इति शौनकीये शिथिलीशांतिः समाप्तः ॥

959

Sl. No. 12644 शिथिलीशांतिकल्पः (बोधायनोक्ता) Ms. No. P. 4863/98

Beginning :

अथ शिथिलीशान्तिविधिं व्याख्यास्यामः—

वसिष्ठ-गार्ग्य-गौतम-भृगु-भरद्वाज-गालव-बोधायल + + + + अनुमतेन वर्त्मना शिथिल्युत्पातशान्तिं कुर्यात् ॥

End :

मृत्यु + + + + शिथिल्युत्पातनिमित्तशान्त्यर्थं ब्राह्मणान् भोजयेत् । आशिषो वाचयित्वा शिथिल्युत्पातनिमित्तसूचितसर्वदोषं नश्यन्ति । सर्वारिष्टशांतिर्भवतीति भगवान् बोधायन आह ॥

Colophon

इति श्रीबोधायनोक्त-शिथिल्युत्पातशांतिः ॥

960

Sl No. 12645 शिथिलीशान्तिकल्पः Ms No P 4863/99

(पौराणिकः– स्मृतिसारसमुच्चयान्तर्गतः)

Beginning :

अथ पुराणोक्त-शिथिलीशान्तिविधिरुच्यते –

वशिष्ठ-कात्यायन-गार्ग्य-गौतम-भृगु-भरद्वाज-गालव-याज्ञवल्क्य-बोधायन-बृहस्पति + + + + + + अवश्यं विधातव्या शिथिलो शांतिः ॥

End :

काका वा गृध्रा वा यस्य शिरसि ताडयन्ते × × × × × तद्दोषा × × इति × × × × × × ॥

Colophon :

इति वसिष्ठादिसमस्तमुनिप्रोक्तस्मृतिसारसमुच्चये धर्मशास्त्रोक्तशिथिल्युत्पातशान्तिविधिः समाप्तः ॥

961

Sl. No. 12647 शिथिलीशांतिकल्पः Ms. No. P. 5587/36

(हेमाद्रीकः)

Beginning :

अथ शिथिलीशांतिविधिं व्याख्यास्यामः–

वसिष्ठ-गार्ग्य-गौतम-भृगु-भरद्वाज-गालव-बोधायन-बृहस्पति-शौनक-शातातप व्यास-विष्णु-पुलस्त्य × × × × × अनुमतेन वर्त्मना शिथिलीशांति कुर्यात् ।

End :

ऋत्विग्भिश्च दक्षिणां दद्यात् । मधुरेण ब्राह्मणान् भोजयित्वा × × समापयेत् । + + + + एवं तत्राद्भुतोत्पातकर्मणमेव शांतिः ॥

Colophon :

इति हेमाद्रौ शांतिप्रकरणे वसिष्ठ-गार्ग्यादि-मुनिप्रोक्तशांतिकर्मणीशिथिलीशांतिः समाप्ता ॥

962

Sl. No. 12659 शिथिलीशांतिकल्पः Ms. No. P. 9764/13

(वासिष्ठः)

Beginning:

वसिष्ठः-

वसंति शरदि ग्रीष्मे शिथिली नैव दोषदा ।
नैव स्थिरचरर्पादौ चन्द्रतारबालान्निते ॥
अन्यतौ × × × शांतिं तत्र च कारयेत् ।

End :

तस्माच्छांतिः प्रकर्तव्या विप्रभोजनपूर्विका ।
न कुर्याद्यदि वा मोहात् तत्तत्फलमवाप्नुयात् ॥

Colophon:

इति वासिष्ठशिथिलीशांतिः ॥

963

Sl. No. 12664 शिवमूर्तिदानपद्धतिः Ms. No. P. 9428/129

Beginning :

एवंगुण × × × × × × सर्वाभीष्टसिध्यर्थंशिवमूर्ति × × दानं करिष्ये ।

प्रसीद भव देवेश × × × × × ।
त्वन्मूर्ते × × × × मे ॥

End :

शिवेनैतज्जगत्सर्वं × × रम् ।
तस्मादनेन दानेन प्रीयतां पर × × रः ॥

Colophon:

– – – –

964

Sl. No 12665 शिवलिङ्गदानपद्धतिः Ms. No. P. 9284

Beginning :

प्रसीदतु भवो नित्यं कृत्तिवासा महेश्वरः ।
पार्वत्या सहितो देवः मम चोत्पत्तिकारकः ॥

End :

शिवशक्त्यात्मकं यस्मात् जगदेतच्चराचरम् ।
तस्मादनेन सर्वं मे करोतु भवत्वांचितम् ॥

इति ॥

Colophon:

इति शिवलिङ्गदानमन्त्रः ॥

965

Sl. No. 12666 शिंशुमारदानपद्धतिः Ms. No. C. 909/2

Beginning :

...

शिंशुमारप्रतिमादानम्—

शिंशुमाराय तम इति मन्त्रेण भूः प्रपद्ये ; भुवः प्रपद्ये + + + भूतानां श्रेष्ठोसि ; त्वां भूतान्युपपर्यावर्तन्ते; नमस्ते; नम ; सर्वं ते नमो नम ; शिंशुमाराय नमः ।

रचनाप्रकारः—

मलमृढविवर्जिते शुभमासे शुक्लपक्षे कल्याणर्क्षे + + भूभागे + + + यथासम्भवतण्डुलराशिं कृत्वा + + + सङ्कल्प्य वेदोक्तायुर्युतपुत्रप्राप्त्यर्थं यायल्लोक्तप्रकारेण मृतपुत्रत्वहरशिंशुमारदानं करिष्ये ॥

End :

.......सर्वग्रहाधार लोकानुग्रहकारण ।
तत्र दानेन मे भूयात् मृतसन्तानतिष्कृतिः ॥
इति दद्यात् प्रयत्नेन नान्यथेदं भविष्यति ॥

Colophon :

– – – – – –

Extra information:

सुवर्णपरिमाणम्–

जालसूय + + + सर्षप रजः तस्य उच्यते ॥
+ + + ॥
अष्टगुञ्जासमं पृश्नि पृश्निपट्कं तुला स्मृतः ।
तुलाद्वयं तु तिष्कं स्यात् फलं निष्काष्टकं स्मृतम् ॥

इति ग्रन्थान्ते दानविषयोपयोगिभूतसुवर्णपरिमाणविचारोऽपि विस्तृतः ॥

966

Sl. No. 12667 शिंशुमारप्रतिमापूजाविधिः Ms. No. C. 3463/3

Beginning :

अथ शिंशुमारप्रतिमापूजा—

माघे मासि सिते पक्षे पञ्चम्यां भौमवासरे ।
प्रतिमां शिंशुमारस्य स्वर्चितां प्रददाति यः ॥१॥

मृतापत्याख्यदोषेण मुच्यते नात्र संशयः ।
एकनिष्कसुवर्णेन दत्वा प्रतिकृतिं हरेः ॥२॥

End :

शिंशुमार नमस्तेऽस्तु ममापायं व्यपोहय ।
तव दानेन मेऽद्य त्वं सन्ततिं वर्धयाच्युत ॥

शिशुमारकदोषपरिहारार्थं शिशुमारप्रतिमादानं तुभ्यमहं सम्प्रददे विप्राय वेदविदुषे । कायेन वाचा । आशिषः गृह्णीयात् ॥

Colophon :

इति शिंशुमारप्रतिमादानविधिः समाप्तः ॥

967

Sl. No. 12668 शिशुरक्षाशांतिः Ms. No. P. 2914/11

Beginning :

कपिलसंहितायां--

शिशुसंरक्षणार्थाय भूतग्रहनिवारिणीम् ।
रक्षां संध्यासु कुर्वीत निम्बसर्षपगृजनिम् ॥

End :

शिशोर्ललाटगण्डेषु रक्षां कुर्याद्यथाविधि ।
मन्त्रसंरक्षणादेव शिशुः संवर्धते .... ॥

Colophon:

इति शिशुरक्षाविधिः ॥

968

Sl. No. 12671 शीतज्वरहरशांतिः Ms. No. P. 604/53

Beginning :

शीतज्वरे हृषीकेशं समालक्ष्य च पूर्ववत् ।
अर्चयित्वाभिषेकाद्यैः ताम्बूलैश्च ततःपरम् ॥

\+ \+ \+

क्षमाद्राय विशुद्धात्मा मन्त्रमुच्चारयन्निमम् ।
पक्षिवाहन गोविन्द वराहवदन प्रभो ॥

End :

सम्पूर्णकुम्भन्तु ज्वरग्रस्तस्य देहिनः ।
अग्रतः प्राङ्मुखः स्थित्वा तर्पयेत्तज्जलेन तु ॥
पञ्चन्यरुतिर्दश (?) तेन मन्त्रेणानेन निश्चलः ॥

Colophon

\-- -- -- --

969

Sl. No. 12675 शीतज्वरहरशांतिः Ms. No. P. 2914/35

Beginning :

बलिदानं प्रवक्ष्यामि वैष्णवज्वरहारिणाम् ।
× × × ॥
तस्य शांतिं प्रवक्ष्यामि बलिपूजाविधानतः ॥

End :

आचार्यः पूजयेदत्र निगमस्थो जितेन्द्रियः ।
प्रयोगकुशलो दक्षी . . . . ॥
आयुरारोग्यसिध्यर्थं प्रतिरूपं प्रपूजयेत् ॥

Colophon :

-- -- --

970

Sl. No. 12685 शुक्रप्रीतिदानविधिः Ms. No. P. 604/12

(यामलोक्ता)

Beginning :

अथातः सम्प्रवक्ष्यामि शुक्रप्रीतिकरं शुभम् ।
सप्तमे दशमे षष्ठे यदा भार्गवनन्दनः ॥
तदा काले महादोषे कलहं बन्धुसम्भवः । + +
तद्दोषशमनार्थाय राशिर्निष्पापसन्तिकम् ॥
कुर्याच्छुद्धस्थले धीमान् पात्रं रजतनिर्मितम् ॥

End

एवं यः कुरुते भक्त्या शुक्रदोषविवर्जितः ।
दुष्टग्रहोत्थदोषाद्युन्मुखः शुक्रचितान्वितः ॥

Colophon :

इति यामलोक्तशुक्रप्रीतिदानविधिः ॥

971

Sl. No. 12693 शुक्रशांतिः (यामलोक्ता) Ms. No. P. 2914/00

Beginning :

अतः परं प्रवक्ष्यामि शुक्रशान्ति समाचरेत् ।
स्वजन्मराशिस्थानेषु स्थानेषु भृगुनन्दनः ॥

दुःखं राज्यं विनाशं च दारिद्र्यं कलहं तथा ॥

End :

आचार्याय ततो दद्यात् वस्त्रं चादिप्रदक्षिणम् ।
विभवे सति गां दद्यात् प्रतिधान्यं च दापयेत् ॥

सर्वक्लेशविनिर्मुक्तः सर्वारिष्टविवर्जितः ।
सर्वान्कामानवाप्नोति नात्र कार्या विचारणा ॥

Colophon :

इति यामळोक्तशुक्रशांतिः ॥

972

Sl. No. 12697 शुक्रशांतिः (सारावळीया) Ms. No. P. 5635

Beginning:

अथातः सम्प्रवक्ष्यामि शुक्रशान्ति महर्षयः ।
मया दोषाः प्रणश्यन्ति दुस्स्थानज्जाच्च शुक्रिणः ॥

End:

एवं कृत्वा विधानेन शुक्रशांतिं मह × × ।
सर्वान् कामनवाप्नोति न स पापैः प्रबध्यते ॥

Colophon :

इति सारावळ्यं शुक्रशांतिः ॥

973

Sl. No. 12710 शुक्रशांतिविधिः Ms. No. P. 3023/17

Beginning :

निष्कावबध्यं कलशं निधाय यम × × × ।
...पश्चिमदिग्भागे स्थंडिले तण्डुलेन तु ॥
पद्ममष्टदळं कृत्वा × × × × × ॥

End :

तुभ्यमहं संप्रददे न ममेति दद्यात् । दक्षिणे श्वेताश्वं विष्णो नमश्चरूपाणि (!) यस्मादमृ संभवः × × × × × × × × ॥

Colophon :

— — — —

974

Sl. No. 12711 शुक्लचतुर्दश्यार्तवशांतिः Ms. No. P. 10041/104

Beginning

शुक्लपक्ष चतुर्दश्यां नारी ऋतुमती यदा ।
मृतपुत्रवती कन्या कुलटी कुलनाशिनी ॥
दोषापहरणार्थाय शांतिं कुर्याद्यथाविधि ।
पुण्याहवाचनं कुर्यात् पूर्ववत्सर्वमाचरेत् ॥

End :

मृत्युंजय महादेव नीलग्रीव सदाशिव ।
तव दानेन सकलान् मम सन्तु मनोरथाः ॥
एवं कृत्वा महाशांतिं सर्वगण्डं च शाम्यति ॥

Colophon :

इति यामलोक्तचतुदर्शीरजस्वलाशांतिः ॥

975

Sl. No 12712 शूद्रशांतिः Ms. No. P. 2570/47

Beginning :

नागान्तरस्त्रीशूद्रस्य जपहोमार्चनादिभिः ।
किञ्चार्तपैकादानेन(?) शांतिर्भवति निश्चयम् ॥

End :

शूद्रस्य भूशुभं नास्ति गार्भादानादिकर्मसु ।
तन्त्रमात्राविधानेन शूद्रस्यैव विधीयते ॥
सर्वं हि विधिना कुर्यात् स्पृशेद्यानं समाचरेत् ॥

Colophon :

इति शूद्रशान्तिः ॥

976

Sl No. 12717 शूलहरशूलदानम् Ms. No P. 3804/78
(वायुपुराणान्तर्गतम्)

Beginning:

अथ शूलदानम् वायुपुराणे--- ऋषयः ऊचुः---

समीरण जगत्प्राण पवमान . . . विभो ।
वक्तुमर्हसि वो दानं येन पापं व्यपोहति ॥
कर्मणा मनसा वाचा बदबुद्धिकृतं भवेत् ।
पापं तस्य क्षयोपायं वक्तुमर्हसि नः प्रभो ॥

End :

अवश्यं कुरुते पापमज्ञानाज्ज्ञानतो यतः ।
सर्वं वर्षे ततो × × × × तस्यापनुत्तये ॥

Colophon :

इति वायुपुराणोक्तसर्वपापक्षयत्रिशूलदानविधिः ॥

977

No. 12718 शूलरोगहरशांतिः Ms. No. P. 909/20

(चतुर्वर्गचिन्तामण्यनुगुणा)

Beginning:

अथ शूलरोगहरत्रिशूलदानम् । तदुक्तं चतुर्वर्गचिन्तामणौ—

शूलेन शूली भवति मनुष्याणां च हिंसकः ।
पलेनाथ तदर्धेन तदर्धार्धेन वा पृथक् ॥

End:

जपसंख्या नेत्रसेचनम्— यावद्रोगविमुक्तिः । यथाशक्ति ब्राह्मणान् भोजयेत् । सूर्यपूजा च कार्या नेत्राधिदेवतात्वात्तस्य ॥

Colophon:

इति नेत्रशूलहरम् ॥

978

Sl. No. 12719 शूलरोगहरशांतिः (गार्ग्योक्ता) Ms. No. P. 7970/68

Beginning :

शूलदोषशांतिः—

संक्रान्तौ जन्मनक्षत्रे पूर्वमायुर्धनक्षयं ।
यस्य स्वजन्मराशौ च नक्षत्रे × × जन्मसु ॥

End :

संक्रान्तिशूलदोषं मे दोषं हरति तद्धृतं ।
संक्रान्तिशूलदोषं मे निवारस्य दिवाकर ॥

Colophon :

इति गार्ग्योक्ते संक्रांतिशूलदोषशान्तिः ॥

979

Sl. No 12720 श्रवणनक्षत्रजननशान्तिः Ms. No. P. 4863/65

Beginning :

अभिजित्पञ्चदशदिनेषु × × × पीडा भवति । अथ होमनक्षत्राराधनं पूर्ववत् तत्र विशेषः ।

End :

कांचनपत्र-चम्पकपत्रोदकेनाभिषेकं कुर्यात् । नक्षत्रदेवताप्रीत्यै कांस्यपात्रसहितधेनुं दक्षिणां दद्यात् । ब्राह्मणान्भोजयित्वाऽशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति श्रवणनक्षत्रशांतिः ॥

980

Sl. No. 12721 श्रवणनक्षत्रजननशांतिः Ms. No. P. 5930/104

Begining:

श्रवणायां पञ्चदशदिनेषु × × × पीडा भवति । अथ होमनक्षत्राराधनं पूर्ववत् । तत्र विशेषः ।

End:

उपहोमसमये विष्णवे स्वाहा । स्तोकाय स्वाहा । यमायस्वाहे ति । ततश्चन्द्रमसे स्वाहा । नक्षत्रदेवताप्रीत्यै कांस्यपात्रसहितधेनुं दक्षिणां दद्यात् । ब्राह्मणान्भोजयित्वा आशिषो वाचयित्वा आयुरारोग्यं भवति ॥

Colophon :

इति श्रवणनक्षत्रशांतिः ॥

981

Sl. No 12722 श्रवणनक्षत्रजननशांतिः Ms. No. P. 9254/108

Beginning :

अथ श्रवणनक्षत्रजननशांतिः–

श्रावण्यां च दशदिनेषु मासद्वय वापोडा भवति । अथ होमनक्षत्रदेवताराधनं पूर्ववत् । तत्र विशेषः—

अग्न्यनुमत्योर्मध्येविष्णुः श्रोणानक्षत्रदेवतेति भेदः । विष्णुदेवतास्वरूपम्–

कृष्णवर्णं चतुर्भुजं गदाशङ्खचक्रधरं गरुडारूढं + + + साधिदैवतं प्रत्यधिदैवते ध्यायेत् ॥

End:

नक्षत्रदेवताप्रीत्यै कांस्यपात्रसहितधेनुं दक्षिणां दद्यात् । ब्राह्मणान् भोजयित्वा आशिषो वाचयित्वा आयुरारोग्य भवति ॥

Colophon :

इति श्रवणनक्षत्रशांतिः ॥

982

Sl. No. 12724 श्रेयःप्राप्तिविधिः Ms. No. P. 3374/37

Beginning :

जन्मनक्षत्रे जन्मराशौ वा सङ्क्रमे चक्रादिपीडायां वा जन्मेषु दुस्स्वप्नेषु + + + वा शुचौ देशे उपलिप्य + + नवकुम्भं शुद्धोदकेन पूरयित्वा– ॥

End :

आचार्याय गां दत्वा . . . . आज्यं निरीक्ष्य दानं दद्यात् । मासि मास्येवंकृते सर्वापक्षयकरं भवति ; सर्वसम्पदमवाप्नुयात् ॥

Colopohn:

इति श्रेय प्राप्तिविधिः ॥

983

Sl. No. 12725 श्लेष्मरोगहरप्रतिमादानविधिः Ms. No. P 2282/25

Beginning :

शूलरोगप्रकारेणोक्तमेव । श्लेष्महराणि । तत्र शातातपः—

त्रिषु ... री च पुरुषो जायते । श्लेष्मा .... धाय उपोष्य सततं सोऽपि द × × × लशतत्रयम् ॥

End

सहस्रामवा .... होमश्चाष्टोत्तरायुधम् ।
ना.... येण . . . सीत अर्वा . . . स वि येत् ॥

Colophon

-- -- -- --

984

Sl. No. 12727 श्वानप्रवेशशांतिः (शौनकीया) Ms. No. P. 4180/106

Beginning :

अथ शुनशान्तिः—

शौनकोऽहं प्रवक्ष्यामि शुनः शान्तिविधिं क्रमात् ।
देवालये सज्जगेहे गृहे वारोहयेच्छुनम् ॥

+ + + + + ।

दृष्टमात्रे चतुर्दिक्षु द्विजराजविनाशनम् ।

+ + + + +

विष्ठिते वर्जयेद्दूर्ष ततशांतिर्विधीयते ॥

End :

अकृत्वा त्वेमां शांतिं नाशमाप्नोत्यसंशयः ।
तस्मात्सुखत्वसिध्यर्थं शांतिमेव समाचरेत् ॥

Colophon:

इति शौनकीये शुनप्रवेशादिशांतिस्समाप्तः ॥

985

Sl. No. 12729 श्वानारोहणशांतिः Ms. No. P. 3085/68

(बोधायनीया)

Beginning :

अथातः श्वानशांतिं व्याख्यास्यामः—

गृह्यदुपरि श्वानरोहणदेशे शीघ्रं छित्वा गृहं छित्वा- सूर्यरश्मीन् प्रवेशायित्वा उष्णेन वारिणा शायत्त्या प्रोक्ष्य,- ॥

End :

आचार्याय वस्त्रप्रतिमां दत्वा ऋत्विग्भ्यो दक्षिणां ददाति । ततो दोषात्प्रमुच्यते; ततो दोषात्प्रमुच्यते; इत्याह— भगवान् बोधायनः ॥

Colophon :

श्वानशांतिस्समाप्ता ॥

Extra information:

ग्रन्थस्यास्योपलब्धिक्रमसंख्या तावत् विषयविवरणपट्टिकायां P. 3087/68 इति । अशुद्धः निक्षिप्तः । स चात्र P. 3085/68 संख्यात्वेन ग्राह्यः ॥

986

Sl. No. 12730 श्वानारोहणशांतिः Ms. No. P. 7970/120

Beginning :

अथ × × × गारेश्वानारोहणावरोहणे । × × × वायसो वा गृहं × × गृहमारोहे तथा ॥

End :

ब्राह्मणान्सपूज्यआशिशो वाचयित्वा शिवं शिव इति × × × व्याख्यात इत्याह भगवान्बोधायनः ॥

Colophon :

इति शूनारोहणशान्तिः ॥

987

Sl. No. 12]]31 शुक्रप्रीतिदानविधिः Ms. No. P. 8889/1

(यामलोक्ता)

Beginning :

पृथगष्टोत्तरंच्चैव अष्टविंशतिमेव वा ।
त्रियम्बकेति मन्त्रेण तिलहो× × माचरेत् ॥

End

एवं यः कुरुते मर्त्यः शांतिकर्मविधानतः ।
सद्यो मृत्युभयं × × × युर्लभते नरः ॥

Colophon :

इति यामळोक्ता श्वानारोहणशांतिः समाप्ता ॥

988

Sl. No. 12732 श्वासहरादानविधिः Ms. No. C. 3662/2

Beginning :

अथ श्वाशहरजपाराधनम् पद्मपुराणे वोधायनः—

अपरदिने नवम्यां सर्वज्ञजयन्ती । तत्कालं विज्ञाय + ·|· तत्प्रादुर्भावकाले ·|· ·|· आदिगुरुजयन्त्युक्तकर्म आचरणीयम् । श्रीगुरुकमलनयनक्षेत्रगमनं जातम् ॥

Colophon:

— — —

Extra information :

वर्षे वर्षे कार्तिकशुद्धपौर्णमीमारभ्य तदागामि संवत्सरसम्बन्धिकार्तीकशुद्धदशमीपर्यन्तं दत्तात्रेयाभिमतेष्टतिथिषु तदनुग्रहादिसम्पादनाय आचरणीयाराधनक्रमः विस्तारतोऽत्र प्रयोगरूपेण विधिरूपेण च वर्णितः ॥

89

Sl. No. 13227 दर्शद्वादशदेवयजनम् Ms. No. P. 8000/33A

Beginning :

दर्शद्वादशदेवेभ्यः तिलसर्पिगुडोदकम् ।
शार्ङ्गधन्वाय स्वाहा । गरुडध्वजाय स्वाहा ।
यज्ञपुरुषाय स्वाहा । पुण्डरीकाक्षाय स्वाह ।
गोवर्धनाय स्वाहा । + +
श्रवणाधिदेवता सापूपघृतेन . . . . . .
शुक्लद्वादशदेवेभ्यः जुहुयात् घृतपायसम् ॥

End:

चतुर्भुजाय स्वाहा । गदापाणिने स्वाहा । + सुलोचनाय स्वाहा + + सुरान्तकाय स्वाहा । दर्शद्वादशदेवेभ्यः तिलसर्पिगुडोदनम् ॥

Colophon :

\- - - -

90

Sl. No. 13228 दुर्गापूजाविधिः Ms. No. P. 2130/

(नवरात्रीयमहानवमींछत्रादिपूजा)

Beginning :

पुष्पम्—

जयन्ति मङ्गळ × ळे भद्रकाळि कपालिनि ।
दुर्गे × धात्रि स्व × हे नमोऽस्तु ते ॥

प्रदक्षिणमन्त्रः—

महिषासुरसंहारविधात्रि वरदे नमः ॥
रूपं देहि बलिं देहि यशो देहि द्विषो जहि ॥

End :

चण्डिकायां प्रदत्तानि सर्वदुष्टनिबर्हिणि ।
क्षुरिके रक्ष मां नित्यं × य च स्तु ते ॥

क्षुरिकाया नमः । षोडशोपचारपूजां कुर्यात् ॥ सर्वायु- ॥

Colophon :

– – – – – –

91

Sl. No. 13229 **दुर्गापूजाविधिः** **Ms. No. P. 8410/36**

Beginning :

विद्युद्दामसमप्रभां मृग × स्कन्धस्थितां भीषणां
कन्याभिः करवालखेटविलसद्धस्ताभिरासेविताम् ।
हस्तैश्चक्रगदासिखेटविशिखं चापं गुणं तर्जनीं
बिभ्राणं मनसात्मिका शशिधरां दुर्गां त्रिनेत्रां स्मरेत् ॥

\+ + + +

पञ्चरत्नोदकैश्चैव नानागन्धोदकैस्तथा ।
स्वादोदकैश्च क्षीरैश्च अभिषेकः प्रकीर्तितः ॥

End :

नमस्कारः–

देव्या यथाततमिदं जगदात्मशक्त्या
निश्शेषदेवगणशक्तिसमूहमूर्त्या ।
तामम्बिकां अखिलदेवमहर्षिपूज्यां
भक्त्यानतोऽसि विदधातु शुभानि तानि ॥

प्रार्थना । यस्य स्मृत्येति ॥

Colophon :

सम्पूर्णम् ॥

92

Sl. No. 13232 दुर्गालक्ष्मीस्वरतीपूजा Ms. No. P. 2130/8

(महानवमीपूजा)

Beginning:

शिवार्थ × × × देवि शरण्ये × × साधिके ।
इदं गृहाण चार्घं च पवित्रं × × मया ॥

दुर्गायैः नमः ; इदमर्घ्यम् ॥

End :

सरस्वति × × तुभ्यं वरदे कामरूपिणि ।
इदं पुष्पं मया दत्तं गृह्णीष्व वरदे शुभे ॥

सर × × त्यै × × : पुस्पाणि समर्पं × × मि ॥

Colophon :

-- -- --

93

Sl. No. 13235 देवताध्यानम् (मूर्तिध्यानम्) Ms. No. P. 604/86

Beginning:

उद्यद्भास्वत्समामाविदितनवजपमिन्दुदामावनद्धः-
द्योतन्मौळीं त्रिनेत्रां विविधमणिलसत्कुंडलां पद्मगांच ।
हाराग्रे रेव....चागुणिमणिवलयाद्यैर्विचित्राम्बराड्यां
अंबां पाशांकुशाढ्याद्याभयवरकरातमांबिकां तां नमामि॥

End:

देव्यास्तु दक्षिणं पाणिं स्कन्दे देवस्य कारयेत् ।
वामपाणौ तथा देव्या दर्पणं दापयेच्छुभम् ॥

Colophon:

इति मूर्तिध्यानम् ॥

94

Sl. No. 13236 देवताप्रतिष्ठाविधिः (बोधायनीया) **Ms. No. P. 3023/123**

Beginning :

पूर्वेद्युः मङ्गळस्नाननित्यकर्मानुष्ठानानि सर्वं कृत्वा, सर्वदेवप्रतिष्ठादिशं कृत्वा तस्य देवालये गृहे वा ईशानदेशे प्रतिष्ठामण्डपमलंकृत्य आचार्यब्राह्मणैस्सह स्वस्तिवाचनं नान्दीमुखं कृत्वा आचार्यादिषड्ऋत्विजान्वरयेत् ॥

End :

ब्राह्मणानाशिषो वाचयित्वा आचार्यादिभिरन्यैश्च बन्धुभिः सह यजमानो भुञ्जीत । सुखं तिष्ठेत् । एवंकृतसंस्कारदेवस्येष्टकामयजमानायाभीष्टं ददातीत्याह भगवान् बोधायनः ॥

Colophon :

— — — —

95

Sl. No. 13237 देवताप्रतिष्ठाविधिः (शौनकीया) **Ms. No. P. 4374/3**

Beginning :

शौनकोऽहं प्रवक्ष्यामि देवतास्थापनक्रमम् ।
शैवं वै भावभक्तिश्च गाणापत्यं तथैव च ॥

End :

दश दानादिकं दद्यात् ब्राह्मणेभ्यस्सदक्षिणाः ।
ब्राह्म × × × षो वाचयेदथ ॥

Colophon :

इति शौनकीये देवताप्रतिष्ठाविधिः समाप्तः ॥

96

Sl. No. 13240 देवताप्रतिष्ठाविधिः Ms. No. C. 1054

(बोधायनसूत्रोक्ता-- कपिञ्जलसंहितीया वैदिकागमोक्तप्रतिष्ठाविधिः)

Beginning :

बोधायनसूत्रोक्तप्रतिष्ठाविधिः । तत्प्रयोगस्तु कपिञ्जलसंहितायाम्—

अथातस्सम्प्रवक्ष्यामि विष्णो × × मुत्तमम् ।
माघफाल्गुनमासे वा ज्येष्ठे वा मार्गशीर्षके ॥

+ + + +

विष्णोश्च × × पनं युक्तं सामान्येन हनूमतः ।
रोहिणीमृगशीर्षे च श्रोणायां × × तथा ॥

End:

प्रतिष्ठाप्याथ सङ्कल्प्य प्राण × × ।
× × × × ॥

× × देवस्य इत्यथ ।
× × परांते तु कृत्वा न × × ॥

Colophon:

– – –

97

Sl No. 13242 देवताविष्टरवर्णनम् Ms. No. P. 3023/108

Beginning

ವಿಷ್ಟರಾಲು–

पद्मासनः पद्मवर्णः द्विभुजः × × तः × × कुं × पद्मरूस्तश्चव्यायाविगहनाय (?) कठ । आसत्येन ।

श्वेतवर्णाकृतिः सोमः द्विभुजो वरदं दधत् ।
दशाश्वरथमारूढः रक्ष मां तारकेश्वर ॥

आप्यायस्वेति पूजा ॥

End :

रुद्रश्चेतो वृषारूढः श्वेतमाल्यश्चतुर्भुजः ।
शूलखड्गाभयवरान् दधन् सोमे प्रसीदतु ॥

त्रियम्बकपूजा ॥

Colophon:

– – – –

98

Sl. No. 13243 देवपूजापूजाविधिः Ms. No. P. 2422/6

Beginning:

स्वाचान्तस्सोर्ध्वपुण्ड्रः प्रणमनमजिनाद्वासनी चासुयाम-
स्साङ्गन्यासो जपस्स्याद्धृदयकमलके मानसी देवपूजा ।
वामस्थं वारिपात्रं कुसुममितरतश्चान्यदग्रेऽर्घ्यपाद्या-
चामस्थानीयशुद्धार्घ्यांगभरितनुकुसुमस्वात्मनां प्रोक्षणं स्यात् ॥१॥

End :

प्रणमश्च समुत्थानं स्वागतं पुष्पमेव च ।
सान्निध्ययाचनं चैव तत्राह्वानस्य सत्क्रियाः ॥

Colophon :

– – – –

99

Sl. No. 13244 देवपूजाविधिः Ms. No. P. 2469/1

(तान्त्रिकक्रमपूजाविधिः)

Beginning :

हरिं शिवं शिवहरिं दुर्गां स्कन्दं गणाधिपम् ।
शास्तारं वन्दल वक्ष्येऽहं तत्पूजादीन् यथाक्रमम् ॥

End :

एवं जलादिजलान्तं मूर्तिपूजां कुर्यात् । नैवेद्यादिकं यथाक्रमं यथाशास्त्रं कुर्यात् ॥

Colophon :

इति सरस्वतीपूजा समाप्ता ॥

100

Sl. No. 13248 देवपूजाविधिः Ms. No. C. 623/1

(शौनकीयः)

Beginning :

शौनकोऽहं प्रवक्ष्यामि देवपूजाविधिं क्रमात् ।
पञ्चपञ्चउषःकाले समुत्थाय पुमान् ततः ॥

End :

गृहान् प्राप्य यथाप्राप्तं अन्नादिकमदेत्सुधीः ।
ततश्च पण्डितैस्साकं चोरजारकथां पठन् ॥
कालो नेयः × × × शयीतापि × ॥

Colophon:

इति शौन × × पू × वि × समा × ॥

101

Sl. No. 13249 देवपूजाविधिः Ms No. C. 3424/14

Beginning :

अथाङ्गपूजा—

अनघाय शिरः पूजयामि । कृष्णाय ललाटं पूजयामि ।
अनन्ताय मुखं पूजयामि । अच्युताय कण्ठं पूजयामि ।
चक्रिणे बाहून् पूजयामि । वैकुण्ठाय वक्षस्थलं पूजयामि ।

End :

वनमालादिभूषिताय नमः । श्रीवत्साङ्काय नमः ।
जगत्सेव्याय नमः । श्रीधराय नमः ।
श्रीपतये नमः । हरये नमः ।
शीकृष्णाय नमः × × । पु - - - समर्पयामि ॥

Colophon :

– -- – --

102

Sl. No. 13250 देवीपूजाविधिः Ms No. P. 2350/1

Beginning :

एवं पूर्ववत् महाषोढान्यासं कृत्वा पूजामारभेत । पूजाविधिप्रकारः— कलशशङ्खपूजां कृत्वा पीठपूजां कुर्यात् । रौं क्लीं सौः- मं मण्डूकाय नमः ; कालाग्निरुद्राय नमः ॥

End:

अथ शङ्खा . . . . श्रीपात्र × पात्राणि स्व × × णादि वामान्नः स्वापयेत् । ततः कल्पोक्तवूकारेण (?) आचार्यमतेन पूजयेत् ॥

Colophon ;

इति पात्रस्थापनविधिः ॥

103

Sl.No. 13251 देवीपूजाविधिः (त्रिपुरसुन्दरीमण्डलपूजा) Ms. No. P. 2360/2

Beginning :

श्रीगुरुगणपतीष्टदेवताः प्रणम्य भूशुद्धि - - - भूतशुद्धि-अन्तर्मातृका-बहिर्मातृका-प्राण-प्रतिष्ठान्तं कृत्वा + + सङ्कल्प्य ममोपात्त + . प्रीत्यर्थं + + त्रिपुरसुन्दरीप्रसादसिध्यर्थं चैत्रादिशुक्ल × थमादितिथिमण्डलनित्यपूजां वा करिष्ये ॥

End :

गुरुं स्तुत्वा च नत्वा च भुक्त्वा बन्धुजनैस्सह ।
तमालदलशय्यान्ते विहरेच्च यथासुखम् ॥

श्रीगुरोः कृपया वच्मि देवदेवीप्रसादतः ॥

श्रीगुरुपरदेवतार्पणमस्तु । ओं . . . तत्सत् शान्तिस्तवं पठेत् ॥

Colophon :

– – – –

104

Sl. No. 13253 देवीपूजाविधिः Ms. No. P. 5746/11

Beginning:

भूशुद्धिः—

आदौ शिखां वं × × × वा । ओं परो रजसि खाद ओं ।

ऊर्ध्वकेशि विरूपाक्षि मांसशोणितशोभने ।
तिष्ठ देवि शिखाबन्धे चामुंडे चापराजिते ॥

End :

तस्मिन् स्वशरीरे सर्वात्मकं सर्वज्ञं सर्वशक्तिसमन्वितं समस्तमन्त्रदेवतामयं सच्चिदानन्दस्वरूपं परब्रह्म स्वात्मकरूपेणानुप्रविष्ट तिष्ठतीति भावयेत् । पुण्यपुरुषं ध्यात्वा ॥

Colophon :

– – – –

105

Sl. No. 13259 देवीपुष्पपूजाविधिः Ms. No. P. 8307/61

Beginning :

अथद्रोणपुष्पपूजा—

शिवाय नमः ।

सद्योजाताय नमः ॥

वामदेवाय नमः ॥

End:

ईशानाय नमः । + +

वृषवाहनाय नमः ।

पार्वतीपतये नमः ॥

Colophon:

— — — —

106

Sl. No. 13260 द्वात्रिंशदुपचारक्रमः Ms. No. P. 2380/86

Beginning :

आवाहनासने पाद्यमर्घ्यमाचमनीयकम् ।

स्नानं वस्त्रोपवीतञ्च गन्धः पुष्पम् च पूरकम् ॥

End ;

स्तुतेर्ध्वजश्च छत्रं च चामरं वाहनं तथा ।

पञ्चोपचारा देवस्य यानासनपरिग्रहे ॥

Colophon :

इति द्वात्रिंशदुपचारक्रमः ॥

107

Sl· No. 13261 द्वारपालकपूजापद्धतिः Ms· No· B· 10367/13

Beginning :

पूर्वद्वारे द्वारश्रियै नमः ; शङ्खाय , चक्राय हनुमते । दक्षिणद्वारे द्वारश्रियै नमः ; गरुत्मते शार्ङ्गाय बाणाय पश्चिमद्वारे द्वारश्रियै नमः ॥

End :

परतः ब्राह्मणेभ्यो प्राग्भागे– दुर्गायै विष्णवे, नमः । वामे स्वाहायै स्वधायै नमः ॥

Colophon :

– – – –

108

Sl· No· 13262 धन्वन्तरियपूजाविधिः Ms· No· P· 5672/101

Beginning :

अथातस्सम्प्रवक्ष्यामि ज्येष्ठमासे विशेषतः ।
मूलर्क्षे तु कृतां पूजां श्रुणुष्व सुरसत्तम ॥

End:

नैवेद्यं कारयेत्तत्र भक्षयुक्तं प्रपूजयेत् । + +
एवं कृत्वा विधानेन × × प्रार्थ्य समाचरेत् ॥

Colophon :

इति × × पूजाविधानम् ॥

109

Sl. No. 13263 धात्रीफलपूजाविधिः Ms. No. P. 8307/62

Beginning :

अथ धात्रीफलपूजा–

भवाय नमः ।
भवनाशिने नमः ।
रुद्राय नमः ॥

End :

कालरूपाय नमः ।
सर्वदेवनमस्कृताय नमः
श्रीगङ्गाविश्वेश्वराय नमः ।
धात्रीफलं समर्पयामि ॥

Colophon:

-- -- --

110

Sl. No. 13264 नक्षत्रध्यानपूजाविधिः Ms. No. C. 2239/74

Beginning :

अष्टाविंशतिनक्षत्राणां ध्यानपूजां करिष्ये–

हुतभुग्रक्तवर्णश्च चतुर्हस्तः पराजितः ।
स्रुक्स्रुवौ चाभयवरौ मेषवाहनमे × × ॥

× × पातु कृत्तिकाः । अग्नि × देवः सुविते दधातु । ओं कृत्तिका. नक्षत्रदेवतां अग्निमावाहयामि ॥

End :

अनेन विधिना कृत्वा अभिषेकं समाचरेत् । + +
आवेक्ष्य चाज्यदानं च प्रतिमादानमाचरेत् ॥

Colophon :

-- -- --

111

Sl. No. 13265 नन्जुण्डेश्वरपूजाक्रमः Ms. No. P. 6696

(नन्जेश्वरशिवपूजाक्रमः:)

Beginning :

उपचारप्रियं शम्भुं सर्वज्ञं सततोदितम् ।
मन्त्रमूर्तिं महादेवं भक्तानां भुक्तिमुक्तिदम् ॥

ಇದು ನಮಸ್ಕಾರ ಮಂತ್ರವು

End :

श्रीमनोन्मनाय नमः मन्त्रपुष्पम् ।

नमश्शिवाय शान्ताय व्योमकेशाय ते नमः ॥
व्योमकार नमस्तुभ्यं चन्द्रसूर्याग्निलोचन ॥

साम्बसदाशिवाय नमः; नमस्कारं समर्पयामि । ब्रह्मादिसुरकोटिरंजितश्रीपदांबुजं पुनरथ × × प्रदर्शयामि । प्रीतो भव सदाशिव । श्रीमहादेवाय नमः ॥

Colophon:

-- -- -- --

112

Sl. No. 13266 नदीपूजाविधिः Ms. No. P. 2708/6

Beginning :

— — — — सरस्वति ।
नर्मदे सिन्धो कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

वारुणकलशदेवताभ्यो नमः ; ध्यानाबाहनादिषोडशोपचारपूजां समर्पयामि ।

End :

भीमरथ्यै गङ्गायमुनासरस्वत्यादिदेवताभ्यो नमः ; ध्यानावाहनादिशोडशोपचारपूजां समर्पयामि)

सर्वेषु कालेषु समस्तदेशे
ष्वशेषकार्येषु तथेश्वरीश्वरः ;
सर्वैस्स्वरूपैर्भगवा —
.... ॥

Colophon :

- - - - - -

113

Sl. No. 13267 नवग्रहपूजाविधिः Ms. No. P. 658/4

Beginning :

आकृष्णेनेत्यस्य मन्त्रस्य- हिरण्यस्तूप ऋषिः ; सविता देवता ; + + यजमानस्य सूर्यग्रहप्रसादसिध्यर्थे सूर्यग्रहाराधने विनियोगः- आकृष्णेन + + भुवनानि पश्यन् ।

वेदीमध्ये विकसितकमले कर्णिकायां रथस्थः
सप्ताश्वाकोंरुणरुचिवपुस्सप्तरज्जुर्द्विबाहुः ।
गोत्रे रम्ये बहुविधगुणे काश्यपाख्ये प्रसूतः
कालिङ्गाख्ये विषयजनितः प्राङ्मुखः पद्महस्तः ॥

End :

केतुग्रहप्रत्यधिदेवताचित्रगुप्तप्रसादसिध्यर्थे जपे विनियोगः ।

ओं सचित्रचित्रं चिन्तयन्तमस्मि
चित्रक्षत्रं चित्रतमं वयोधाम् ।
चन्द्रं रयिं पुरु वीरं बृहन्तं
चन्द्रं चन्द्राभिर्गृणते युवस्व ॥

Colophon :

– – –

114

Sl. No. 13270 नवग्रहपूजाविधिः (रुद्रयामलीयः) Ms. No. P. 2914/67

Beginning:

एहि जगन्नाथ सुस्थिरो भव विष्टरे ।
पूजां गृहाण भगवन् कृपया रक्ष मां सदा ॥

सूर्याय नमः ; विष्टरं समर्पयामि ॥

End :

गृध्रासनस्थो जमदग्निजात्मजः
वरप्रदो वक्रमुखो गदाभृत् ।
शताननो धूम्रवपुः किरीटी
प्रसीदतां नो भगवान् हि केतुः ॥

+ + + +

जैमिनिगोत्रसम्भूतं चित्रवर्णं च धूम्रगम् ।
तव मूर्तिप्रदानेन योगदोषो व्यपोहतु ॥

Colophon :

– – – –

115

Sl No. 13271 नवग्रहपूजाविधिः Ms. No. P. 3666/3

Beginning:

ताम्रप्रतिमायां भगवन्तमादित्यं ग्रहाधिपतिं पद्मासने प्राङ्मुखं ·+ + + साङ्गं सायुधं सवाहनं ·+ + सूर्यग्रहं ध्यायामि ; स्थापयामि पूजयामि ॥

End:

केतुं कामरूपं ·+ + जैमिनिगोत्रं ·+ ·+ चित्राम्बरमाल्याभरणं ·+ + कपोतवाहनेन अधिदेवताप्रत्यधिदेवतासहितं + ·+ ध्यायामि ; स्थापयामि पूजयामि ॥

Colophon :

— — — —

116

Sl. No. 13273 नवग्रहपूजाविधिः Ms. No. P. 4335/61
(स्कान्दपुराणीया)

Beginning :

पूर्वोक्त ·+ ·+ विशिष्टायां शुभतिथौ ·+ ·+ + आदित्यादिनवानां ग्रहाणां शुभैकादशस्थानफलावाप्त्यर्थं अधिदेवता-प्रत्यधिदेवता-अङ्गदेवता-आवरणदेवतासहितं नक्षत्रादिनवग्रहदेवता उद्दिश्य ·+ ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ॥

End:

य इदं कवचं दिव्यं सर्वरोगविनाशनम् ।
सर्वशत्रुविनाशं च धारयेद्बुद्धिमान्नरः ॥

Colophon :

इति श्रीस्कान्दपुराणे केतुकवचस्तोत्रं समाप्तम् ॥

Extra information :

ग्रन्थोऽयं तावत्–

पद्मपुराणीयैः	आदित्यकवच न शनैश्चरस्तोत्र-कवच-राहुकवचैः
ब्रह्मकैवर्तकेयेत	चन्द्रकवचेन
महापुराणीयेन	अङ्गारककवचेन
स्कान्दीयै	बुधशुक्रकेतुकवचैः
ब्रह्माण्डीयेत् सवलितः वर्तते ॥	गुरुकवचेन च

117

Sl. No. 13275 नवग्रहपूजाविधिः Ms. No. P. 5930/40

Beginning :

अणिमादिगुणाधार नमस्ते दिव्यचक्षुषे ।
काश्यपेय नमस्तुभ्यं नमस्त्रैलोक्यधारिणे ॥

अर्घ्यम् ।

End :

घृतं आदित्याय, परमान्नं चन्द्राय, गुडोदनं अङ्गारकाय, क्षीरान्नं बुधाय, दध्यन्नं बृहस्पतये शर्करान्वितं घृतान्नं शुक्राय, कृसरान्नं शनैश्चराय मधुक्षीरपायसलवणोपेतं राहवे, चित्रान्नम् केतवे ॥

Colophon · .. .. ..

118

Sl. No. 13282 नवग्रहपूजाविधिः Ms. No. P. 7401/132

Beginning :

ग्रहाणामाद्यपम् × × × कृतम ।
सहस्ररश्मि लोकानां × × × तम् ॥

ग्रहाणामधिपं सूर्यं ध्यायामि ॥

End :

केतो इदं निराजनं समर्पयामि । केतवे नमः यस्य स्मृत्येत्यादि प्रार्थनान्तं पूर्ववत् ॥

Colophon :

-- -- -- --

119

Sl. No. 13289 नवग्रहपूजाविधिः Ms. No. P. 9128/7

Beginning:

ऐशान्यां वेदिकां कृत्वा तदुत्तरपूर्वदेशे ·|· ·|· कलशं + ·|· नवरत्नानि प्रक्षिप्य ·|· + तत्र ग्रहपीठानि लिखेत् । कर्णिकायां सूर्याय वर्तुलाकारं ·|· + वायव्यदले केतवे ध्वजाकारं + + तत्तत्पीठे तत्तत्प्रतिमाः संस्थापयेत् ॥

End:

कांस्यप्रतिमायां भवावन्तं केतुं + जैमिनिगोत्रं मध्यदेशेश्वरं ·|· + ·|· चित्रकपोतरथवाहनेन दिव्यं रुमित्यां बाह्यपूजां कुर्यात् ॥

Colophon :

- - - -

120

Sl. No. 13291 नवग्रहपूजाविधिः Ms. No. P. 9254/49

(नवग्रहप्रियकरान्ननिवेदनक्रमः

Beginning:

घृतान्नमादित्याय, परमान्नं चन्द्राय, गुडोदनमङ्गारकाय, क्षीरान्नं बुधाय, दध्यन्नं बृहस्पतेः ॥

End :

शर्करान्नं घृतान्वितम् शुक्राय, कृसरान्नं शनैश्चरार्थं, मधुक्षीरपायसलवणोपेतम् राहवे चित्रान्नम् केतवे ॥

Colophon :

— — — —

121

Sl. No. 13296 नवग्रहप्रतिष्ठाविधिः Ms. No. P. 7401/134

Beginning :

कृतनित्य × × प्रा × × सं × × × सूर्यग्रहप्रतिष्ठं करिष्ये ।

पद्मासनः पद्मकरः × × ।

× × × × ॥

सूर्यभगवान् सुप्रतिष्ठितो भव ॥

End :

एवं कृत्वा तु पूजां × ।

नवग्रह × × नरोत्तम ॥

यस्य स्मृत्येत्यादि ॥

Colophon :

— — — —

122

Sl. No. 13298 नवरत्नपूजाविधिः Ms. No. P. 7970/82

Beginning :

वज्रं मुक्ताफलं माणिक्यं मरकतं तथा ।

गोमेधिकं च वैडूर्यं पुष्परागं तथैव च ॥

End :

प्रवालसहितं चैव रत्नं हि परिकीर्तितम् ।
आयुर्वृद्धिकरं पुण्यं ग्रहदोषापहारकम् ॥

Colophon:

– .. – ..

123

Sl. No. 13299 नवरात्रिपूजाविधिः Ms. No P. 4154/16

(सुप्रभेदागमेकरणतन्त्रार्गतः)

Beginning :

ನವರಾತ್ರಿಪೂಜೆ—

नवरात्रिविधिं वक्ष्ये श्रुणु पद्मसमुद्भव ।
सर्वसौभाग्यजनन × × सर्वसम्पत्प्रदायकम् ॥

\+ + + + ।

आश्वयुक्शुक्लपक्षे तु प्रतिपद्दिनतो नव ।
दिनानि पुजयेद्देवीं दशम्यां तु विसर्जयेत् ॥

End :

पुंर्वंशकृतवा (?) नारी दुष्टवन्यग्रगान् हरेत् ।
ग्रामप्रदक्षिणं कृत्वा प्रविशेदालयं प्रति ॥

Colophon :

इति सुप्रभेदे कारणे नवरात्रिविधिर्नाम पञ्चविंशतिपटलः ॥

124

Sl. No. 13300 नवरात्रिपूजाविधिः Ms. No. P. 4154/38

(धर्मप्रवृत्यन्तर्गता–दुर्गार्णवीया)

Beginning:

दुर्गार्णवे–

प्रातरभ्यञ्जनं कृत्वा पुण्याहं वाचयेत्ततः ।
ऋत्विजो वेदसम्पन्नान् कृत्वा देवीं प्रपूजयेत् ॥

End

यं यं कामयते देवी तं तं तस्मै प्रयच्छति ।
तस्मात् सर्वप्रयत्नेन पूजनीया मनीषिभिः ॥

Colophon :

इति श्रीनारायणविरचितायां धर्मप्रवृत्तौ नवरात्रिप्रकरणं समाप्तम् ॥

125

Sl. No. 13303 नवरात्रिपूजाविधिः Ms. No. P. 9952/17

Beginning :

अश्वपूजाविधिः । अथ रेवन्तपूजा—

पङ्कजासनसंभूत श्रीहस्तेनाभिवर्धित ।
महावाहननामा त्वां अश्वमावाहयाम्यहम् ॥

End :

उत्तरोत्तरवृद्धिं च क्रमशः सर्वदा .... यम् ।
प्रयच्छध्वं ममानिवरथे तत् त्वये भक्तिदायकम् ॥

इति प्रार्थनम् ॥

Colophon:

इति आयुधपूजाविधिस्समाप्तः ॥

126

Sl. No. 13304 नवरात्रिपूजाविधिः Ms. No. C. 215/1

Beginning :

प्रतिपदप्राइरभ्यङ्गं कृत्वा × × × हं वाचयित्वा + + मम इह जन्मनि दुर्गाप्रीतिद्वारा + + स्व सर्वाभीष्टसिध्यर्थं शारदानवरात्रीप्रतिपदवी × × कलशस्थापन दुर्गापूजाक्रमादिपूजनादीनि करिष्ये । + + +

आगच्छ वरदे देवि दैत्यदर्पनिषुदनि ।
पूजा गृहाण सुमुखि नमस्ते शङ्करप्रिये ॥

End :

मोक्षलक्ष्मै नमः । कीर्तिलक्ष्मै नमः ।
जयलक्ष्मै नमः । सिद्धिलक्ष्मै नमः ।
राज्यलक्ष्मै नमः । भाग्यलक्ष्मै नमः ॥

Colophon :

इति चण्डीपूजाविधानम् समाप्तम् ॥

127

Sl. No. 13305 नवरात्रिपूजाविधिः Ms. No. C. 3473/2

Beginning :

पुण्याहं वाचयित्वा कलशं संस्थाप्य प्रतिपद्मारभ्य नवम्यन्तं चण्डीपूजनादि करिष्ये ; इति सङ्कल्प्य—

चामुण्डि चण्डि देवेशि सर्वशत्रुविनाशिनि ।
सान्निध्यं कुरु कापालि नमस्ते शङ्करेश्वरि ॥

End:

महालक्ष्मि महादेवि अष्टलक्ष्मिस्वरूपिणि ।
कृपया पाहि मां देवि विष्णुवक्ष्यस्थलस्थिते ॥

Colophon:

इति × × × × विधानं समाप्तम् ॥

128

Sl. No. 13307 नागप्रतिष्ठाविधिः Ms. No. P. 60/38

(शौनकीयः)

Beginning:

अथ नागप्रतिष्ठां च वक्ष्ये संक्षेपतस्तथा ।
श्रीवोदगयने शुक्ले पक्षे शुद्धतिथिर्यथा ॥

तदा संस्थापनं कार्यं अजन्मे वसुलग्नके ।
जलाधिवासनं कर्ता कुर्यात्पूर्वदिनेऽहनि ॥

End:

अनेन विधिना यस्तु करोति स्थापनं यदि ।
नागेन्द्रस्य प्रसादेन सर्वान् कामानवाप्नुयात् ॥

Colophon:

इति शौनकीये नागप्रतिष्ठाविधिः समाप्तः ॥

129

Sl. No. 13309 नागप्रतिष्ठाविधिः Ms. No. P. 734/31

(कर्मविपाकान्तर्गता–पराशरोक्ता)

Beginning:

× × × × हननजोपसम्प्रानपत्यतानिवृत्यर्थं सर्पप्रतिष्ठाविधिरुच्यते — + + +

आसुनीतेति मन्त्रेण प्रतिष्ठां कारयेद्बुधः ।
नमो अस्तु × ×पेत्य इ × सर्पसूक्तेन वा पुनः ॥
ध्यानादिकैः षोडशभिरुपचारैः प्रकल्पयेत् ॥

End :

एवं यः कुरुते विद्वान् सर्वपापैः प्रमुच्यते । +
वन्ध्यादोषो न भवति वंश्यानां च विशेषतः ॥
प × मान् धनवान् लोके पूज्यश्च भवति ध्रुवम् ॥

Colophon :

इति पाराशरीये कर्मविपाके सर्पप्रतिष्ठाविधिः ॥

Extra information :

ग्रन्थान्ते—

अदि:वन्ध्या × व × गर्भे च मृतप्रजा ।
कदलीवन्ध्ययेकं तु देवी सा × नाशनम् ॥
काकवन्ध्या सकृत्सूते स्त्रीवन्ध्या केवलं स्त्रियः ॥"

इति वन्ध्याफलाफलविचारः वर्णितः ॥

130

Sl No. 13314 **नागप्रतिष्ठाविधिः** **Ms. No. P. 4640/2**

Beginning

नागप्रतिष्ठां वक्ष्येऽहं श्रुणुध्वमृषिसत्तमाः ।
प्रसीदति हरिर्येन सर्वकामप्रदो नृणाम् ॥

+ + +

सौवर्णरजतैर्वापि ताम्रैर्वा मृच्छिलादिभिः ।
शिल्पिभिः कारयेद्देवं सर्वलक्षणसंयुतम् ॥

End :

कुम्भाभिषेकं विधिवन्मूलेनैव ततो गुरुः ।
प्रतिष्ठितक्षणं कृत्वा नागदेवं समर्चयेत् ॥

\+ + + +

नमो अस्तु सर्पेभ्यः ; इति मूलमन्त्रः ॥

Colophon:

— — —

Extra information :

ग्रन्थान्ते –

" नागराजाय विद्महे सर्पराजाय धीमहि । तन्नोऽनन्तः प्रचोदयात् इति सर्पगायत्री "
इति सर्पगायत्र्यपि उट्टङ्किता ॥

131

Sl. No. 13315 नागप्रतिष्ठाविधिः Ms. No. P. 4640/6

(शौनकीया– बोधायनकल्पोक्ता)

Beginning:

बोधायनकल्पे–

प्रमादात्सर्पहनने प्रायश्चित्तं × × ते ।
ज्ञानतस्सर्पहनने प्रायश्चित्तं न विद्यते ॥

ऐश्वर्यराजवश्यादिपुत्रसिध्यर्थमेव च ।
महानागप्रतिष्ठां तु कुर्याद्देवालये बुधः ॥

End :

एवं यः कुरुते भक्त्या पुत्रपौत्रांश्च सम्पदः ।
सुदीर्घायुरवाप्नोति नागेन्द्रस्य प्रसादतः ॥

Colophon :

इति शौनकीये नागप्रतिष्ठाविधिस्समाप्तः ॥

132

Sl No. 13316 नागप्रतिष्ठाविधिः Ms. No. P. 7446/15

(नागप्रतिष्ठानागलक्षणं च- ब्रह्माण्डान्तर्गतम्)

Beginning :

नागप्रतिष्ठानागलक्षणम् ।

नारदः-

लोकनाथ चतुर्वक्त्र सर्वधर्मविशारद ।
अनपत्यवतांलोके प्रजावृद्धि कथं भवेत् ॥

ब्रह्मोवाच-

श्रुणु नारदवक्ष्यामि विविधैः पापसञ्चयैः ।
पूर्वार्जितैरपत्यानां हानिर्भवति पञ्चधा ॥

\+ \+ \+ \+

तद्दोषपरिहाराय वृध्यर्थं स्वकुलस्य च ।
नागराजं प्रतिष्ठाप्य स्वस्थिमान् पुत्रवान् भवेत् ॥

End:

निरामयो भवेन्मर्त्यः सर्पपीडाविवर्जितः ।
भोगवान् स सुखान् नित्यं भवेदेव न संशयः ॥

Colophon :

इति श्रीब्रह्माण्डपुराणे ब्रह्मनारदसंवादे नागप्रतिष्ठाविधिः समाप्तः ॥

133

Sl. No. 13318 नित्यार्चनपद्धतिः Ms. No. P. 312/2

Beginning :

अन्तस्तिमिरनिर्भेदभानवे कामधेनवे ।
सदन्तेवासिनां कल्पतरवे गुरवे नमः ॥

अथ भस्मस्नानविधिः + + + प्राणानायम्य सङ्कल्प्य + + द्वार-
पालकान् पूजयेत् ॥

End :

अकारादिक्षकारान्तं मातृकादि न्यसेत्क्रमात् ।
शिरोललाटनेत्रेषु कर्णयोरपि दण्डयोः ॥

\+ + + +

कवर्गं सव्यहस्ते तु चवर्गं वामहस्तके ।
चवर्गं दक्षिणे पादे तवर्गं वा × × ॥

Colophon :

२९, तमे पत्रे–

इति मन्त्रन्यासपटलः ॥

134

Sl No. 13320 नित्यार्चनपद्धतिः Ms. No. C. 216/1

Beginning :

आचम्य प्राणानायम्य + + + शुभुखरचेत्यादि देशकालौ संकीर्त्य अमुक-
कामनासिध्यर्थे अमुकदेवताप्रीत्यर्थं यथामिलितोपचारैः पूजनमहं करिष्ये । + + कलश-
शङ्खघण्डाः संपूज्य, ध्यात्वा,

अवाहयामि देवेश पूजाकरणकाम्यया ।
यावत्पूजा समाप्येत तावत्त्वं सुस्थिरो भव ॥

End :

प्रवालमुक्ताफलपूगरत्नैः
जाम्बूनदाद्यैरपि चाष्टगन्धैः ।
पुष्पाक्षतैर्युक्तममोघशक्ते
दत्तं मयार्घ्यं सफलीकुरुष्व ॥

+ + + +

आवाहनं न जानामि - - - - - - ॥

अनेन यथामिलितोपचारैः पूजनेन श्रीपरमेश्वरः प्रीयताम् ॥

Colophon:

– – – –

135

Sl. No. 13322 निषसादकल्पः Ms. No. P. 10041/22

Beginning :

निषसादकल्पऋग्विधानानि । ऋग्विधाने–

निषसाद धृत इति जपहोमादिसिद्धिदः ।
कथं कृष्ण पुरा ख्यातः अमृतक्षत्रियो नृपः ॥

End :

निषसाद द्विजो राज्ये देवेन्द्रपुरवासिनाम् । + +
सोमसूर्यप्रभा तेजो श्रियं पुत्रं पशुं धनम् ॥

वेदशास्त्रप्रभास्तत्र सत्यं होमजपं श्रियम् ॥

Colophon:

इति ऋग्विधाने निषसादकल्पः समाप्तः ॥

136

Sl. No. 13323 पञ्चाङ्गरुद्रन्यासविधिः Ms. No. P. 4540/3

(रुद्रन्यासविधिः--रुद्रजपहोमार्चनाभिषेकविधिः)

Beginning :

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः—

नमस्ते निधनापैतु यो रुद्रः परिकीर्तितः ।

प्राणिनां ग्रन्थिरसीति रुद्राः पञ्चाङ्गसंज्ञिकाः ॥

End :

मेरुकैलासनिलये सर्वैश्वर्यसमन्वितम् ।

तस्मिन् महासने रम्ये स्थिरो भव वृषध्वज ॥

Colophon :

-- -- --

137

Sl. No. 13324 पञ्चाङ्गरुद्रन्यासविधिः Ms. No. P. 5946/12

(बोधायनीया)

Beginning :

अथातः पञ्चाङ्गरुद्राणां न्यासपूर्वकं जपहोमार्चनाभिषेकविधिं व्याख्यास्यामः—
या ते रुद्रेति शिखायाम्—

या ते रुद्र शिवा तनूरघोरापापकाशिनी ।

तया नस्तनुवाशन्तमया गिरिशं ताभिचाकशीहि ॥

शिखायै नमः ॥

End :

रुद्रविधानं पापक्षयार्थी + + + अन्नादिकामो वा कुर्यात् । एवं सिद्धिमवाप्नोति, इत्याचार्याय दशगात्यवत्यां (?) गां दद्यात् ; अश्वमेधफलमवाप्नोति ; इत्याह भगवान् बोधायनः ॥

Colophon:

-- -- --

Extra information :

ग्रन्थान्ते तावत्–

कश्चरणकृतं चाकर्म वाक्कायजं वा
श्रवणनयनजं वा मानसं वापराधम् ।
विहितमहितं वा सर्वमेतत् क्षमस्व
शिव शिव करुणाब्धे श्रीमहादेव शम्भवो ॥

इति शम्भुस्तुतिपरः स्वापराधक्षमाप्रार्थनपरश्चकः श्लोकः दृश्यते ॥

138

Sl. No. 13329 पञ्चामृताभिषेकक्रमः Ms. No. P. 5920/15

Beginning:

ओं आपो हिष्ठा, आप्यायस्व- समेतु ते , स- गषे, संतेपमार्गूंसि, सद्योजाताय। नमः + + क्षीरेण स्नापयामि । + + + क्षीरस्नानानन्तरं वारिणा स्नापयामि ॥

End :

श्रीभवानीशङ्कराधिदेवताभ्यो नमः ; पञ्चामृतस्नानानन्तरं शुद्धोदकस्नानं समर्पयामि ॥

Colophon :

-- -- -- --

139

Sl. No. 13332 पञ्चायतनपूजा Ms. No. P. 2914/76

Beginning :

आदित्यमम्बिकां चैव विष्णवीशं च ह × × ।
पञ्चपूजां प्रकुर्वीत दैविकं च विधीयते ॥

End :

× × × × पूजेति तत्फलम् ।
दीर्घायुरस्त्वकर्मणां ..... ॥

तत्त्वज्ञानाय मोक्षाय तत्तत्फलमवा × × × ॥

Colophon :

-- -- --

140

Sl. No. 13334 पञ्चायतनपूजा Ms. No. P. 7401/139

Beginning :

प्राणानायम्य सङ्कल्प्य पूर्वोक्तफलकामः पञ्चायतनपूजां करिष्ये—

आदित्यमांबिकां विष्णुं गणनाथं महेश्वरम् ।
पुंसूक्तोक्तेन मार्गे पूजयेच्च यथाविधि ॥

End :

एवं यः कुरुते भक्त्या वेदमन्त्रोक्तमार्गतः ।
सर्वान् × × प्नोति × × × शिवपदं व्रजेत् ॥

Colophon :

-- -- --

141

Sl. No. 13335 पञ्चायतनपूजा Ms. No. C. 3283

Beginning :

अथ देवपूजा प्रारम्भः—

केशवादिप्राणायामान्त्रं कृत्वा ·|· + ·|· श्रीमद्भागवतो महापुरुषस्य ·|· ·|· ·|· शुभपुण्यतिथौ मम आत्मनः श्रुतिस्मृतिपुराणोक्तफलप्राप्त्यर्थं श्रीमहाविष्णुप्रमुखपञ्चायतनदेवताप्रीत्यर्थं + + ·|· पूजनमहं करिष्ये ॥

End :

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽहमिति मां मत्वा क्षम्यतां परमेश्वर ॥

उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणमोऽष्टाङ्ग उच्यते ॥

इति प्रार्थनानमस्कारः ॥

Colophon :

इति पूजा समाप्ता ॥

142

Sl. No. 13336 पञ्चायतनविधिः (पञ्चायतनस्थापनविधिः) Ms. No. P. 1716/30

Beginning :

शम्भौ मध्यगते हरीन .... रभूदेव्यो हरौ शङ्करे ।
. . . .स्ये नागसुता र . . . हरगणेशाजाम्बिका स्थापिताः ।

End:

देव्यां विष्णुहरैकदन्तरवयो लम्बोदरे . . . रे
नार्याश्शङ्करभागतोऽस्ति सुखदा व्यत्यासतो हानिदाः ॥

Colophon ;

पञ्चायतनविधिः ॥

143

Sl. No. 13338 **पट्टाभिषेकविधिः** Ms. No. P. 9880/1

Beginning:

अथातः पट्टाभिषेकविधिं व्याख्यास्यामः—

शुभेहनि स्वाचान्तः आसने उपावेश्य प्राणानायम्य, एवंगुणेत्यादि सङ्कल्प्य, मम सर्वकामना-सिध्यर्थं + + + श्रीरामचन्द्रप्रसादसिध्यर्थं श्रीरामचन्द्रपट्टाभिषेकपारायणमहं करिष्ये ॥

End

अभ्यषिञ्चन्नरव्याघ्रं प्रसन्नेन सुगन्धिना ।
सलिलेन सहस्राक्षं वसवो वासवं यथा ॥

इति लाजदूर्वाक्षताः समर्प्य संप्रदायानुसारेण × × × पू त्वा × × × यस्य स्मृत्येत्यादि कुर्यात् ॥

Colophon :

- - - -

144

Sl. No. 13339 **पट्टाभिषेकविधिः** Ms. No. C. 568

(पारिजातसंग्रहोक्तः)

Beginning :

पारिजातसंग्रहोक्तपट्टाभिषेकदिनादिषष्टितमवर्षवृध्यभिषेकविधिप्रयोगो लिख्यते—

अथ महाराजः पट्टाभिषेकदिनादारभ्य षष्टितमवर्षपूरणदिवसे पूर्वाह्णे + + प्राणा-नायम्य + + एवंगुणविषेषणविशिष्टायां + + पारिजातसंग्रहस्थशांतिसारकल्पोक्तप्रकारेण पट्टाभिषेकादिषष्टितमवर्षवृध्यभिषेकाख्यं कर्मकरिष्ये ; इति संकल्प्य, आचार्यादिऋत्विग्वरणं कुर्यात् ॥

End :

स्वगृहमागत्य गृहदेवतागुरूंश्च नमस्कृत्य ब्राह्मणान् भोजयित्वा बन्धुवर्गसहितः स्वयं मृष्टान्नं भुक्त्वा यथासुखं विहरेत् ॥

Colopho:n

इति पारिजातसंग्रहोक्तषष्ट्याभिषेकादिषष्टितमवर्षवृध्यभिषेकविधिप्रयोगः सम्पूर्णः ॥

145

Sl. No. 13341 पम्पानदीपूजाविधानम् Ms. No. P. 5511

(भविष्योत्तरपुराणीयम्)

Beginning :

आचम्य प्राणानायम्य एवंगुणविशेषणविशिष्टायां शुभतिथौ भविष्योत्तरपुराणोक्तप्रकारेण पम्पापूजां करिष्ये । कलशपूजां कृत्वा---

सर्वासां सरितां श्रेष्ठे सागरस्य मनोहरे ।
सर्वाभीष्टप्रदे देवि पम्पानदि नमोऽस्तु ते ॥

End :

क्षीरेणाज्येन गव्येन दध्ना शर्करायनघे ।
मधुना च गृहाण त्वं स्नानं पञ्चामृतैः शुभैः ॥

पञ्चामृतम् ॥

Colophon :

- - - -

146

Sl. No. 12342 पार्थिवगणपतिपूजाविधानम् Ms. No. C. 1980/2

(गणेशपुराणीयम्)

Beginning:

पार्थिवगणपतिपूजाप्रारम्भः । पार्वत्युवाच—

दयानिधे गिरीन्द्र त्वं पितर्मे वद सत्वरम् ।
उपासनं गणेशस्य सर्वेशस्य जगद्गुरो ॥

\+ + + +

सुविशुद्धामवल्मीकां जलसिक्तां विमर्जयेत् ।
कृत्वा चारुतरां मूर्तिं गणेशस्य शुभाम् स्वयम् ॥

End:

इति मूर्धि समभ्यर्च्य दण्डवत्प्रणिपत्य च ।
जपेन्मन्त्रं ततो देवि सर्वसिद्धिप्रदायकम् ॥

Colophon :

इति श्रीगणेशपुराणे उपासनाखण्डे गणेशपार्थिवपूजानिरूपणं नाम एकोनपञ्चाशत्तमोऽध्यायः ॥

147

I. No. 13343 पार्थिवलिङ्गपूजा: Ms. No. P. 2151/73

Beginning :

आचम्य, पूर्वोक्तएवङ्कुण, सद्योजातमिति + + + ईशानः सर्वविद्यानां इति समस्तोपचारपूजां कृत्वा सद्योजातमिति ध्यानम्-

हृत्पद्मं शिवधर्मकन्दसहितं सुज्ञाननालं तथा
नित्यैश्वर्यदलाष्टकं शशिनिभं वैराग्यसत्कर्णिकम् ।
श्रीरुद्रान्वितकेसरान्वितमिदं सञ्चिन्त्य तन्मध्यमे
सूर्येन्दूज्वलवह्निमण्डलगतं ध्यायेच्छिवं चिन्मयम् ॥

End:

ईशानस्सर्वविद्यानां इति प्रसादं गृहीत्वा ब्रह्माधिपतिर्ब्रह्मणोऽधिपतिर्ब्रह्म शिवो मे अस्तु इति अग्राङ्गमद्क्षिगामस्कारं तस्माद्गुरुमुखादेश । यस्य स्मृत्येति त्रिकालं वा यथास्थानमुद्वासयामि ॥ अगस्त्यः-

अद्यमे - - - कृतार्थी- - - - - ॥

Colophon:

\- - - -

148

Sl. No. 13345 पार्थिवलिङ्गपूजा (बोधायनीया) Ms. No. P. 3374/49

Beginning:

बोधायनोक्तपार्थिवलिङ्गपूजाविधिरुच्यते—

विष्णुशक्तिसमेते अतीत × × महाकाया अपसर्पन्तु । पृथिव्याः मेरुपृष्ठ ऋषिः । कूर्मो देवता । + + +

प्राणानायम्य देशकालौ सङ्कीर्त्य, भवानीशङ्करमुद्दिश्य भवानीशङ्करप्रीत्यर्थं + + + षोडशोपचारपूजां करिष्ये ॥

End:

प्रदक्षिणनमस्कारम् । छत्रचामरादि प्रदर्श्य पूजा × × × × × × यथा × × × त् ॥

Colophon:

इ × × × × × × पार्थिवलिङ्गपूजाविधिः ॥

149

Sl. No. 13346 पार्थिवलिङ्गपूजा (सकलसारोद्धारीया) Ms. No. P. 4587/7

Beginning:

नारद उवाच—

देव केन विधानेन कर्तव्यं सर्वकामदम् ।
यस्यानुष्ठानमात्रेण कृतकृत्यो भवेन्नरः ॥

ईश्वरः—

मुने सर्वप्रयत्नेन पार्थिवं लिङ्गमुत्तमम् ।
कर्तव्यञ्च नृभिर्नित्यं कार्यमुद्दिश्य यत्नतः ॥

End :

तत: पञ्चाक्षरं चापि जपेच्च विधिना नर: ।
सुतिथौ चैव नक्षत्रे स्तुत्वा नत्वा विसर्जयेत् ॥

Colophon :

इति सकलसारोद्धारे पार्थिवपूजाविधिस्समाप्त: ॥

150

Sl. No. 13347 पार्थिवलिङ्गपूजा Ms. No. P. 4661/141
(शिवानन्दप्रदीपिकीया)

Beginning :

प्राणानायम्य सङ्कल्प्य एवङ्गुण + + शुभतिथौ मम + + सकल-कार्यसिध्यर्थं पार्थिवेश्वरमुद्दिश्य + + कल्पोक्तप्रकारेण षोडशोपचारपूजां करिष्ये ॥

End :

प्रार्थनम्—

गौरीपते नमस्तुभ्यं सदाशिव नमोऽस्तु ते ।
पार्थिवस्य महादेव निवासं कुरु लीलया ॥

Colophon

इति शिवानन्दप्रदीपिकायां × × × समाप्त: ॥

151

Sl. No. 13351 पार्थिवलिङ्गपूजा Ms. No. P. 8189/2
(रुद्रयामलीया)

Beginning :

× × उवाच-

देवदेवि नमस्तुभ्यं × × ने ।
पार्थिवस्य लिङ्गस्य पूजां ब्रू × × ॥

चामु× उ × च–

भक्तस्य मम ते नूनं × × शेषतः ।
यत्पूजनेन देवेशः प्रसीदति न संशयः ॥

End:

देव देव महादेव सर्वज्ञा × × व ।
आत्मात्मीय × × × मि महेश्वर ॥

Colophon :

इति रुद्रयामलीये × × × पार्थिवलिङ्गपूजाविधानं नाम × पटलः ॥

152

Sl. No. 13363 पुनःप्रतिष्ठाविधिः Ms. No. P. 3374/46

Beginning:

एकरात्रादिमासद्वयमर्चनविच्छेदे पुनःप्रतिष्ठा । मासद्वयाध्र्वमर्चनविच्छेदे प्रतिष्ठैव कार्या । शूद्ररजस्वलाद्युपहतौ पुनः प्रतिष्ठा ॥

End:

अथवा सर्वेषां देवानां .... प्रतिष्ठा कार्या । स्वगायत्र्या कलशोदकमष्टोत्तरशत-मभिमनय अभिषिञ्चेत् । इति प्रतिष्ठा कार्या ॥

Colophon :

इति पुनःप्रतिष्ठाविधिः ॥

153

Sl. No. 13365 पुनःप्रतिष्ठाविधिः (बोधायनोक्ता) Ms. No. P. 8048/2

Beginning :

प्रसादहर्म्यशिखरतोरणमण्टपादिषु पुनःकरणेष्वपि नूतनेषु पुरातनेषु वा विधीयते । बोधायनः—

नमस्कृत्वा महादेवं हृत्पद्मस्थं महेश्वरम् ।
हर्म्यादीनां प्रतिष्ठां तु वक्ष्ये सम्यक् समाहितः ॥

End:

अग्निहोत्राश्च वेदाश्च यज्ञाश्च बहुदक्षिणाः ।
कृत्वा यत्फलमाप्नोति तत्फलं स समश्नुते ॥

Colophon :

इति श्रीबोधायनीये वैदिकागमोक्तशिखरप्रतिष्ठाविधिः समाप्ता ॥

154

Sl. No. 16336 पुरुषसूक्तार्चनविधिः Ms. No. P. 7794/2

(पुरुषसूक्तानुगुणदेवपूजाविधिः--अगस्त्यप्रोक्ता)

Beginning :

ಮಾನಸಪೂಜೆ, ದೇವಪೂಜೆಯ ವಿಧಿಯ ಬರೆವುದಕ್ಕೆ ಶುಭಮಸ್ತು ।
पुरुषसूक्तविधिरुच्यते—

स्नात्वा यथोक्तविधिना शुचिर्भूत्वा समाहितः ।
गुरुप्रणतपूतात्मा विष्णुपूजां समाचरेत् ॥

+ + + +

सहस्रशीर्षेति षोडशर्चसूक्तस्य- नारायणऋषिः ; पुरुषो देवता ॥

End :

नीराजनं चापि समर्पितं तु
पुष्पाञ्जलिं स्वीकुरु देवदेव । + +
इन्द्रादिवृन्दारक × × द्यं
रामामुखाम्भोजसुवासिताङ्गम् ॥

मन्त्रपुष्पं समर्पयामि । सुवर्णपुष्पं समर्पयामि । + + + यस्सम्मृत्येत्यादि । यथास्थान-मुद्वासयामि ॥

Colophon :

अगस्त्यप्रोक्तपुरुषसूक्तविधिदेवपूजाविधानं सम्पूर्णम् । ಮಂಗಲಮಹ ॥

155

Sl No. 13368 पुरुषसूक्तार्चनविधिः Ms No. P. 10344/5

(शौनकीया)

Beginning :

ಪುರುಷಸೂಕ್ತವಿಧಾನದೇವತಾರ್ಚನೆ-

ओम् सहस्रशीर्षेत्यावाहनम् ।

ज्योतिश्शान्तं सर्वलोकान्तरस्थं
ओङ्काराख्यं योगिभिर्ध्यानगम्यम् ।
साङ्गं शक्त्या सायुधं भक्तसेव्यं
सर्वाधारं विष्णुरूपं नमामि ॥

आवाहनम् ॥

End :

मज्जन्मसफलं सद्यः त्वत्पादाम्बुजसेवनात् ।
जन्मप्रभृतियत्पापं तत्पापं क्षन्तुमर्हसि ॥

प्रार्थनम् ॥

Colophon :

– – – –

156

Sl. No. 13368 पुरुषसूक्तार्चन(पूजा)विधिः Ms. No. P. 10344/8

(शौनकीया)

Beginning:

शौनकोऽहं प्रवक्ष्यामि पुरुषसूक्तार्चनं विधिम् ।
प्रक्षाळ्य पादौ हस्तौ च आचम्य प्रयतः शुचिः ॥

+ + + +

शुभतिथौ शोभनमुहूर्ते + + मम सर्वाभीष्टफलदायकश्रीलक्ष्मीवेङ्कटेश्वर प्रीत्यर्थं + + स्सम्भवद्भिरुपचारैः यथासम्भावितानियमनपुरुषसूक्तथावच्छन्थं ध्यानावाहनादिषोडशोपचारपूजां करिष्ये ॥

End:

विष्वक्सेनश्च काकूराः शुकाद्याः सनकादयः ।
महाविष्णुप्रसादोऽयं सर्वे गृह्णन्त वैष्णवाः ॥

बाणश्रवणचण्डी च नन्दिभृङ्गिनदादयः ।
सदाशिवप्रसादोऽयं सर्वे गृह्णन्तु शाम्भवाः ॥

यस्यस्मृत्येति पूजासमर्पणम् ॥

Colophon :

– – – –

157

Sl. No. 13269 पुरुषसूक्तार्चन(पूजा)विधिः Ms. No. C. 3453/1

(आश्वलायनीयः)

Beginning:

अथ षोडर्चस्य पुरुषसूक्तस्य विधिः ऋग्विधाने––

वक्ष्ये पुरुषसूक्तस्य विधानं त्वार्चनं प्रति ।
अग्निकार्यं जपविधिं स्तोत्रं चैव तदात्मकम् ॥

End :

समिधः प्रसृचं पूर्णं जुहुयादभिधारतः ।
ततो घृतेन जुहुयात् चरुणा च ततः पुनः ॥

एवं हुत्वा ततस्तस्य समीपे स्तोत्रमुच्चरेत् ॥
+ + + + ॥

षोडशर्चस्य पुरुषसूक्तस्य नारायण ऋषिः । + + + सहस्रशीर्षा पुरुषः । एवं आश्वलायनशाखापाठानुक्रमेण पाठः ।।

Colophon ·

-- -- --

158

Sl. No. 13370 पुष्पपूजाविधिः Ms No C.4805/3

Beginning :

कलिधर्मसारोद्धारे–

अपराधसहस्राणि अपराधशतानि च ।
पद्मेनैकेन देवेशः क्षमते हेलयार्चितः ॥

End:

अयाचिते फलं देयं दत्तं वा भक्तशिष्ययोः ।
न तत्फलविनाशाय हरिपूजनसाधनम् ॥

Colophon ;

इति पुष्पपूजाविधिः ॥

159

Sl. No. 13372 पूजार्ह(देव)स्त्रीलक्षणम् Ms. No. P. 2584/1

Beginning :

अवैष्णवद्विजाय ... स च .... दिवर्जिताः ।
पूज्यन्ते ये स्त्रियो ब्रह्मन् तदा सुर × × च्यते ॥
प्रद्युम्नादीन् स × × र्च × × स्तद्रक्षकं पृथक्
अर्च्यते त × × × लं मूढमाहुर्मनीशिणः ॥

प्रद्युम्नादिस्त्रिथो यत्र न पूज्यंते पितृस्थिताः ।
अनिरुद्धा × × देवे तद्राक्षसं समुदाहृतम् ॥

End :

अनिरुद्धः स्वयं देवः प्रद्युम्नस्तु पिता × × ।
सङ्कर्षणस्तु × × सु देवस्तु तत्पिता ॥

Colophon:

– – – –

160

Sl. No. 13373 पूजाविधानम् Ms. No. P. 863/18

Beginning :

ಪೂಜಾವಿಧಾನ ಬರೆಯುವುದಕ್ಕೆ ಶುಭಮಸ್ತು-

प्रक्षाळितपादपाणिः, आचम्य पूजन × × कृत्य गुरुदेवतां नमस्कृत्य, घण्टानादं कृत्वा,

आगमार्थं तु देवानां गमनार्थं च रक्षसाम् ।
कुरुघण्टारवं तत्र देवताह्वानवाचकम् ॥

End :

अक्षतां समर्पयामि । पुष्पाणि समर्पयामि । ಧೂಪಕ್ಕೆ ದೀಪಕ್ಕೆ- पुष्पाणि समर्पयामि . × नविनिवेदयामि । मन्त्रपुष्पं समर्पयामि ।सुवर्णपुष्पं समर्पयामि सर्वोपचारपुजां समर्पयामि ॥

Colophon:

– – – –

161

Sl. No. 13374 पूजाविधानम् Ms. No. P. 2071/6

(मध्वसम्प्रदायीया--पूजापद्धतिः)

Beginning :

श्रीमद्वेङ्कटकृष्णार्यहृत्कञ्जस्थं रमापतिम् ।
श्रीनिवासं सदा सेवे श्रीमत्पूर्णमतिप्रभुम् ॥

श्रीमद्वेङ्कटकृष्णार्यशिष्येण विदुषां मुदे ।
सुब्रह्मण्येन पूजायाः पद्धतिस्तन्यते हरेः ॥

+ + + +

अथाचान्तः पुरो विष्णोरुपतिष्ठन् समाह्निकम् ।

स्मृत्याद्युक्तप्रकारेण मध्याह्ने देवपूजां कुर्यात् । देवपूजार्थं सप्त पञ्च वा कलशा-नानयेत् ॥

End :

ततो मूलेन प्राणानायम्य अष्टोत्तरमन्त्रजपोपसंहारं मातृकोषसंहारं च कृत्वा तत्त्वोपसंहारं कुर्यात् ।प्रदक्षिणनमस्कारान् कुर्यात् । इत्यशेषमतिमङ्गलम् । ततो वायुस्तुतिपठनम् ॥

Colophon :

इति श्रीवेङ्कटकृष्णार्याणां शिष्येण तिम्मणाचार्यपुत्रेण सुब्रह्मण्येन विरचिता पूजा-पद्धतिः समाप्ता ॥

Extra information :

आत्मा देवानां भुवनस्य गर्भो यथा वशं चरति देव एषः ।
+ + तृतीयमस्य वृष × स्य दोहसे देशप्रमतिं जनयन्त एषणः ॥

आपः पुनन्तु पृथिवीं + + सर्वं पुनन्तु मामापो स तां च प्रतिग्रहग स्वाहा ॥
इति ग्रन्थान्ते वेदमन्त्रद्वयं दृश्यते ॥

162

Sl. No. 13375 पूजाविधानम् (हारीतस्मृतीयम्) Ms. No. P. 3064/4

Beginning :

तुलसीं काञ्चनं गाञ्चसस्पृश्याथ × ।
× × × × ॥

अहन्युदङ्मुखो रात्रौ दक्षिणाभिमुखस्तथा । +
उत्थायातान्द्रितः × × र्जनैः ॥

End:

ध्यात्वा नारायणं देवं रविमण्डलमध्यगम् । +
ततो ब्रह्म × मन्त्रेण पूजयित्वा विसर्जयेत् ॥

Colophon:

– – – –

163

Sl. No. 13376 प्रतिमाशुद्धिः (शौनकीया) Ms. No. P. 4180/80

Beginning :

अथ प्रतिमाशुद्धिः—

अथातः सम्प्रवक्ष्यामि प्रतिमाशुद्धिलक्षणम् ।
आदौ शुद्धिं च प्रतिमां ततः पूजां समाचरेत् ॥

End:

यथा पूजां समासाद्य कृत्वा मन्त्रैः प्रपूजयेत् ।
इति कृत्वा विधानेन तत्कर्म शुभमिच्छति ॥

Colophon :

इति शौनकीये प्रतिमाशुद्धिः ॥

164

Sl. No. 13377 नागप्रतिष्ठाविधिः Ms. No. P. 3127/7

(नवग्रहप्रतिमाप्रतिष्ठाविधिः)

Beginning :

श्रीनारदः—

ब्रह्मन् कमलसम्भूत मायातीत महामते ।
भक्तोऽस्मि तव पुत्रोस्मि × :क्रियतां मयि ॥

श्रुतानि सर्वतत्वानि गुह्याद्गुह्यतमानि च । ·|· +
प्रतिष्ठाप्रतिमानां तु कथं भवति तद्वद ॥

End :

स्थीयते परमात्मासौ प्रतिमासु विनिश्चयः ।
ददति विपुलान् कामान् नात्र कार्या विचारणा ॥

Colophon :

इति नवप्रतिमाप्रतिष्ठाविधिः समाप्तः ॥

165

Sl. No. 13378 प्रतिष्ठाविधिः Ms. No. P. 4624/1

(बोधायनीयः)

Beginning :

पुरं चेद्ग्रामं वा हरिहरगृहारम्भसहितं
सदा × × ष्टं नरहितमुपस्थान × यत ।
न × ते × विष्णोश्चिरसुरमङ्गस्मृतिरुचिरां
प्रतिष्ठां वक्ष्येऽहं सकलमुनिसङ्घैरभिहिताम् ॥

End :

एवं प्रयुञ्जाना + + आत्मानं चैकविंशतिं पङ्क्तिं पुनाति । एतेषां नष्टानां पुनः करणे मौखिकं फलमिति + + ब्रह्मलोके महीयत इत्याह भगवान् बोधायनः ॥

Colophon :

– – – –

Extra infoemation:

ग्रन्थान्ते—

कर्ता शूद्रश्चेत् वेदमन्त्रवर्ज्यं देवतानामभिनमस्कारमन्त्रै पूजनं बलिहरणं उपस्थानं दानमिति च समानम्– इत्ययमधिको भागः दृश्यते ॥

166

Sl.No. 13379 प्रदोषपूजाविधिः Ms. No. P. 3199/6

(अंशुमतन्त्रीया)

Beginning :

प्रदोषस्य विधिं वक्ष्ये श्रूयतां रविसत्तम ।
सर्वपापहरं पुण्यं सर्वदोषविनाशनम् ॥
प्रदोषकाले कर्तव्यं यजनश्च विशेषतः ॥

End :

एवं यः कुरुते मर्त्यः स पुण्यां गतिमाप्नुयात् ।
प्रदोषस्य विधिः प्रोक्तः सुपूजां कर्तुमर्हसि ॥

Colophon :

इत्यंशुमतन्त्रे प्रदोषपूजाविधिपटलः ॥

167

Sl. No. 13380 प्रदोषपूजाविधिः Ms. No. P. 3705/2

(चिन्त्यशास्त्रीयः)

Beginning :

अतःपरं प्रवक्ष्यामि प्रदोषस्य विधिक्रमम् ।
सर्वपापहरं पुण्यं सर्वदोषनिवृत्तनम् ॥

सायंकाले विशेषेण शिवपूजां समारभेत् ।
स × × क्ष पूजयेत्तत्र पञ्चगव्याभिषेचनम् ॥

End:

परिचाराणां यथा × × किञ्च दापयेत् ।
प्रदोषे रुद्रमभ्यर्च्य रुद्रलोके महीयते ॥

Colophon:

इति चिन्त्यशास्त्रे प्रदोषपूजापटलः ॥

168

Sl. No. 13383 प्रायागस्नानसङ्कल्पः Ms No. C. 3583/4

Beginning :

शुक्लांबर + + चतुर्भुजम् । प्रसन्नव + + शान्तये ॥
अगजानन + + र्निशम् । अनेक + + + उपास्महे ॥

ओं तत्सत् श्रीगोविंदगोविंदअद्यश्रीभगवतो महापुरुषस्य + + विन्ध्यस्योत्तरपार्श्वे + + गङ्गायमुनासरस्वतीसङ्गमस्थाने– ॥

End:

सप्तपर्व × × पापक्षयार्थं सकलसम्पत्सम × × जन्मान्तर × × भूत भविष्य × × पुरस्सरं सर्वाभीष्टसिध्यर्थं प्रयागस्नानमहं करिष्ये ॥

Colophon

-- -- --

169

Sl No. 13384 प्राणप्रतिष्ठापनविधिः Ms. No. P. 3384/50

Beginning :

अथ श्रीप्राणप्रतिष्ठामन्त्रस्य × × × × सकलशक्तिकरी प्राणशक्तिः परा देवता । + + + × × × + + +

रक्ताम्भोधिस्थपोताथ स .... रुणसरोजारूढा कराग्रैः
पाशं कोदण्डमिक्षुश्चमरगुणमप्यंकुशं पाञ्चबाणान् ।
बिभ्राणं सृक्क लं त्रिनयनलसितापीतवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परा नः॥

End:

ओं ह्रीं क्रों इत्यनेन प्रकारेण परमेश्वरभावनामन्त्राभ्यां प्राणन्यासं कृत्वा आवरणस्त्रमुद्राय्येत् । तत्समये पायसापूपमहानैवेद्यं निवेदयेत् ॥

Colophon :

इति प्राणप्रतिष्ठापनविधिः ॥

170

Sl. No. 13392 प्राणप्रतिष्ठापनविधिः Ms. No. P. 8714/34

Beginning:

अस्य श्रीप्राणप्रतिष्ठामहामन्त्रस्य– ब्रह्मविष्णुमहेश्वराऋषयः ; ऋग्यजुस्सामानि छन्दांसि, प्राणशक्तिः परा देवता । + + + ध्यानम्—

रक्ताम्बोधिस्थपोतोल्लसदरुणसरोजलिरूढा कराब्जै
पाशं कोदण्डमिक्षुद्भवमधिगुणमप्यङ्कुशं पञ्चबाणान् ।
बिभ्राणासृक्कपालं लिनयनविलसत्पीनवक्षोरुहाढ्या
देवी बालार्कवर्णा भवतु सुखकरी प्राणशक्तिः परान्नः ॥

End:

अतिचारे साध्यभृङ्गान् मण्डूकरूपान् सभृङ्गान् सर्परूपान्ध्यायेत् । साध्यभृङ्गान् पुंरूपान् स्वभृङ्गान् स्त्रीरूपान् ध्यायेत् ॥

Colophon :

इति प्राणप्रतिष्ठाविधिस्समाप्तः ॥

171

Sl. No. 13394 बलींद्रपूजाविधिः Ms. No. P. 4218/59

Beginning:

बलिराजनमस्तेऽस्तु विरोचनसुत प्रभो ।
गामिष्येन्द्रसुरारातिपूजेयं प्रतिगृह्यताम् ॥

End :

इत्यावाहनादिषोडशोपचारपूजां कृत्वा समुद्रमन्तः शयतः इति ॥

Colophon :

इति बलीन्द्रापूजा समाप्ता ॥

172

Sl No. 13397 बलीन्द्रतनपूजाविधिः Ms. No. C. 3417/1

Beginning :

श्रीमद्बलीन्द्रपूजाविधिर्लिख्यते —

आगमार्थं त्विति घण्टानादं कृत्वा एवङ्गुणेत्यादि शुभतिथौ + + भविष्योत्तरपुराणोक्तप्रकारेण सर्वसंपत्प्रदायकश्रीमद्बलीन्द्रपूजां करिष्ये ॥

End :

दृढव्रत महाभाग सत्यसन्ध जितेन्द्रिय ।
वामनानुग्रहप्रीत चिरजीविन् महाबल ॥

सुशील सुन्दराकार भक्तप्रिय दयानिधे ।
साम्राज्यं दीर्घमायुष्यं सर्वभोगांश्च देहि मे ॥

प्रार्थना ॥

Colophon :

इति बलीन्द्रपूजाविधानं समाप्ता ॥

173

Sl. No. 13398 बालत्रिपुरसुन्दरीपूजाविधिः Ms. No. P. 9944/46

Beginning :

पूजास .... नद्रव्यं दक्षिणभागे संस्थाप्य, तत्रैव जलकलशं निधाय, मूलेन गन्धपुष्पाक्षतैरभ्यर्च्य गं गन्धतीर्थं (!) पाशाङ्कुशमुद्राख्य .... मावाह्य,– ॥

End :

अनेन प्रार्थयित्वा, लयाङ्गं कृत्वा शान्ति पठित्वा श्रीपात्रशङ्खमुद्राय × × य अथ सुखं विहरेदेवेति शिवम् ॥

Colophon:

इति श्रीबालत्रि - - - - - - - ॥

174

Sl. No. 13399 बिल्वपत्रपूजा Ms. No. P. 8307/64

Beginning:

अथ बिल्वपत्रपूजा—

श्रीवृक्षममृतोद्भूतमहादेवप्रियं सदा ।
बिल्वपत्रं प्रदास्यामि पवित्रं ते सदाशिव ॥

End :

करवीरं च कल्हारं शतपत्रं च बिल्वकम्
तुलसीमल्लिकाश्चैव अर्पयामि सदाशिव ॥

बिल्वपत्रपूजां समर्पयामि ॥

Colophon

— — — —

175

Sl. No. 13400 बिल्वपत्रपूजा Ms. No. P. 10079/13
(बिल्वपूजातत्फलविचारश्च)

Beginning :

त्रिशाखैर्बिल्वपत्रैश्च अच्छिद्रैः कोमलैश्शुभैः ।
तव पूजां करिष्यामि अर्पयामि सदाशिव ॥१॥

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रियायु .... ।
त्रिजन्म पापसंहारं एकबिल्वं शिवार्पणम् ॥२॥

End

अज्ञानेन कृतं दैवं व्रतमेकस्य दुर्लभम् ।
प्रसादसुमुखान् सर्वान् अर्पयामि सदाशिव ॥

Colophon:

— — — —

176

Sl No. 13401 बिल्वाष्टकपूजाविधिः Ms. No. P. 9671/6

Beginning

बिल्वाष्टकपूजां करिष्ये–

अखण्डैबिल्वपत्रैश्च पूजयेन्न हि शङ्कर ।
मुच्यते सर्वपापेभ्यो एकबिल्वं शिवार्पणम् ॥

End:

करवीरं च कमलं शतवत्रं च वि॒ बकम् ।
तुलसीमल्लिकादीनि अर्पयामि सदाशिव ॥

बिल्वाष्टकपूजां समर्पयामि ॥

Colophon :

- - - -

177

Sl. No. 13402 बुधपूजाविधिः Ms No. P.3504/4

Beginning :

सोमपुत्राय नित्याय सूर्यस्नेहयुताय च ।
आवाहनं बुधस्याहं अमारिभयप्रदम् ॥

बुधावाहानम् ॥

End:

ताम्बूलं क्रमुकं श्रेष्ठं दिव्यबास × या युतम् ।
गृहाण ग्रहरूपाय नारायण नमोऽस्तु ते ॥ + +

दिव्याक्षमालासंयुक्तं दिव्यज्ञानस्वरूपिणम् ।
मन्त्रपुष्पं प्रयच्छामि मामुद्धर जगत्पते ॥

मन्त्रपुष्पम् ॥

Colophon:

- - -

178

Sl. No. 13404 बुधपूजाविधिः Ms. No. P. 8765/9

Beginning :

उदङ्मुखो मागलजो हरित्थः
आत्रेयगोत्रः शरमण्डलस्थः ।
सखड्गचर्मासिगदाधरज्ञो
ईशान्यभागे वरदस्सुपीतः ॥ + +

बुधग्रहं पीतवर्णं + + सूर्यस्येशानभागे + + आवाह्य, सुप्रसन्नो भव; वरदो भव ॥

End:

सां सीं सूम् सैं सौं सः बुधग्रहाय नमः इति मन्त्रेण षोडशोपचारपूजां कुर्यात् । + + सुप्रसन्नो भव; वरदो भव ॥

Colophon:

– – – –

179

Sl. No. 13407 बुधपूजाविधिः Ms. No. C. 3441/4

(बुधग्रहाराधनविधिः)

Beginning :

अथ बुधग्रहाराधनक्रमः । बुधध्यानम्–

पीताम्बरपीतवपुः किरीटीं
चतुर्भुजश्शुद्धमतिर्गदाभृत् ।
चर्मासिधृक सोमसुतस्सदा मे
सिंहाधिरूढो वरदो बुधस्स्यत् ॥

शंखचक्रगदापद्मराजमानकराम्बुजम् ।
सुवर्णवर्णं पुरुषमूर्तिं हृदि विभावये ॥

Colophon :

इतिबुधग्रहाराधनं समाप्ता ॥

180

Sl. No. 13408 बुधातिथ्यविधिः (बुधपूजाराधनविधिः) Ms. No. P. 3023/165

Beginning :

× + इयुपरि वारुणकलशं निधाय इमं मे वरुणेति षोडशोपचारैरभ्यर्च्य + + तारासुताय नमः ॥

× × प्रसार्याथ प्रतिमाराधनं ततः ।
एहि इन्दुसुत × न सुस्थिरो भव विष्टरे ॥

+ + + ।
स्थापयामि महासौम्यं बुधं बुद्धिप्रदायकम् ॥

End :

हिरण्यगर्भ × स्थं हेमबीजम् विभावसोः ।
अनन्तपुण्यफलदं अतश्शांतिं प्रयच्छ मे ॥

यस्येत्यादि ॥

Colophon:

— — — —

181

Sl. No. 13409 बृन्दावनप्रदोषपूजा Ms. No. P. 8307/50

Beginning :

एवङ्गुणविशेषणविशिष्टायां शुभतिथौ श्रीगोपालकृष्णमुद्दिश्य । + बृन्दावनपूजां करिष्ये । + + कृष्णाय ध्यानम् । गोविन्दाय आवाहनम् । कमलासनाय आसनम् । + + तुलसीदामभूषणाय अर्घ्यम् ॥

End :

गोविन्दवृन्दावनाय मनसाभीष्टं प्रार्थनम् । उपायनम् । × ×

× रेताफलं नारिकेलं नानापूरिकमिश्रितम् ।
ताम्बूलं पुष्पसंयुक्तं अतश्शान्ति प्रयच्छ मे ॥

अस्मै प्रा × × णेति दानम् ॥

Colophon :

इति पूजाविधानम् ॥

182

Sl. No. 13410 — बृन्दावनप्रतिष्ठाविधिः (वैखानसागमीया) — Ms. No. P. 3121/28

Beginning :

श्रीवैखानसागमे भृगुः—

बृन्दावनप्रतिष्ठाया विधिं वक्ष्ये विशेषतः ।
द्वादश्यां कार्तिके मासि सिते या × × ॥

+ + + +

बृन्दावनं कारयित्वा शिलायां वाथ मृण्मये ।
ताम्रे वा रजते वापि सुवर्णे दारुणापि वा ॥

End :

अभिषिच्य विशेषेण अभिषेकोक्तमन्त्रतः ।
ब्राह्मणान् भोजयेत् पश्चात् भूरिदानं समापयेत् ॥

Colophon :

इति वैखानसागमे भृगुप्रोक्ते पुनर्बृन्दावनविधिः समाप्तः ॥

Extra information :

ग्रन्थान्ते अयमधस्तनो भागः दृश्यते–

गजदानं चाश्वदानं कन्यादानं तथैव च ।
आन्दोळिकं यामरेजे (?) कुण्डले क × शुभे ॥

दम्पतिपूजनं चापि × तु सहस्रकम् ।
तदर्धं वाथ पादं वा सकृच्चेत्सुखमाप्नुयात् ॥

183

Sl. No. 13412 — बृन्दावनप्रतिष्ठाविधिः (शौनकीया) — Ms. No. P. 8410/64

Beginning :

शौनकोऽहं प्रवक्ष्यामि बृन्दावनमनुत्तमम् ।
देवालये नदीतीरे गृहे वापि समस्थले ॥

प्रतिष्ठां तत्र कुर्वीत बृन्दावनमथाकरोत ॥

End :

एवं कृत्वा प्रतिष्ठां च सर्वान् कामानवाप्नुयात् ॥
इन्द्रलोके चिरं भुक्त्वा अन्ते मोक्षमाप्नुयात् ॥

Colophon :

इति शौनकीये बृन्दावनप्रतिष्ठा परिसमाप्ता ॥

Extra information :

ग्रन्थान्ते- " द्वादशनामानि लक्ष्मीं स्वाहा + + विष्णुवक्षस्थलास्थिताय स्वाहा । इद विष्णुरिति मन्त्रेण समिदाज्यचरुभिर्हुनेत् । इति शौनकोक्तबृन्दावनप्रतिष्ठा समाप्ता ॥ इति दृश्यते ॥

184

Sl. No. 13413 बृहस्पतिपूजाविधिः Ms. No. P. 2581/21

(चतुर्वर्गचिन्तामणीया)

Beginning :

कन्याविवाहकाले तु सिद्धिर्यस्य बृहस्पतेः ।
द्विजस्य चोपनयने विवाहस्तथैव च ॥

जन्माष्टमद्वादशे तु पूजां कुर्याद्विशेषतः ॥

End :

ध्यायेत् बृहस्पतिं पात्रं पद्मं (?)कक्षेऽपि संस्थितम् ।
एवं ध्यात्वा सुरश्रेष्ठं पूजये × × वर्जितम् ॥

बृहस्पते अतिय × × भूर्भुवस्सुवरों बृहस्पतिमावाहयामि इत्यादि पूर्ववत् ॥

Colophon :

इति हेमाद्रौ दानकाण्डे + + बृहस्पतिपूजाविधिः समाप्तः ॥

185

Sl.No. 13414 बृहस्पतिपूजाविधिः Ms. No. P. 4863/29

(बृहस्पतिप्रोक्ता)

Beginning :

कन्याविवाहकाले च सिद्धिर्यस्य बृहस्पतेः ।
द्विजस्य चोपनयये दुस्स्थानस्ये तथैव ह ॥

जन्माष्टके द्वादशेषु पूजां कुर्याद्विशेषतः ।
सौवर्णेन गुरुं कृत्वा पीतवस्त्रं सुशोभनम् ॥

म × नं मधुपुष्पं च पत्रं पालाशशर्बणम् ॥

End :

तथा वामोर्ध्वहस्तेन मातुलुङ्गफलं तथा ।
वामाधरे च यच्छन्तं साधकस्य धनादिकम् ॥

एवं कृत्वा सुरश्रेष्ठं पूजयेच्छाठ्यवर्जितः ।

ओं भूर्भुवस्स्वः बृहस्पतिमावाहयामिति पूर्ववत् ॥

Colophon :

इति बृहस्पतिप्रोक्तबृहस्पतिपूजाविधानं परिसमाप्तम् ॥

186

Sl. No. 13422 भगवदाराधनकारिका Ms. No. P. 9106/-
(वेङ्कटनाथीया--मानसीदेवपूजा)

Beginning :

श्रीमान् वेङ्कट ,, + केसरी । वेदान्ता + हृदि ।

स्वाचान्तः सोर्ध्वपुण्ड्ः प्रणमनमजिनाद्यासनं सुयामः
साङ्गन्यासो जपस्स्याद्धृदयकमलके मानसी देवपूजा ।
वामस्थं वारिपात्रं भस्त्यतितरतश्चान्यदग्रेर्ध्यपाद्या
चामस्नानीयमर्ध्योद्धरितनुतसुमस्स्वात्मनं प्रोक्षणं स्यात्

End :

आह्वानं सासनार्घ्यं पदसलिलमथाचामपुंसूक्तयुक्त-
स्नानं पत्रोपवीते मलयजकुसुमे धूपदीपौ क्रमेण ।
मध्वादिः पर्ककादावुपरि च सलिलं पायसाद्यन्नजातं
पानीयाचामपूगं परिगतिनमनोद्वासनं विष्णुपूजा ॥

कवि + शालिने । श्रीमते वेङ्कटेशाय + नमः ॥

Colophon :

- - -

187

Sl. No. 13423 भागीरथीस्नानसङ्कल्पः Ms. No. C. 481/2

(प्रयागत्रिवेणीसङ्गमस्नानसङ्कल्पः)

Beginning :

ओं गोविन्द ३ पूर्वोच्चरितएवङ्गुणविशेषणविशिष्टायां पुण्यतिथौ + सर्वेषां पापानां प्रायश्चित्तार्थं भागीरथीस्नानमहं करिष्ये ।

+ + + +

नमस्ते कमलनाभाय नमस्ते जलशायिने ।
नमस्तेऽस्तु हृषीकेश गृहाणार्घ्यं नमोऽस्तु ते ।।

माभलेश्वरजटीभूते कृष्णा उभयतोमुखि ।
वेदेन प्रार्थिते गङ्गे गृहाणार्घ्यं नमोऽस्तु ते ।।

End :

सितासिते यत्र तरङ्गचामरे
नद्यो विभाते मुनिभानुकन्निके ।
लीलातपत्रं वट एव साक्षात्
स तीर्थराजो जयति प्रयागः ।।

प्रयाग प्रयाग प्रयाग । समस्तपापक्षयार्थं भागीरथीस्नानमहं करिष्ये ।।

Colophon :

.. .. ..

188

Sl. No. 13424 भार्गवीपूजा (श्रीरहस्यान्तर्गता) Ms. No. P. 6952/13

Beginning :

एकाक्षरी महामाया एकाकी एकनायकी ।
एकरूपी महारूपी बिन्दुपीठे जगन्मयी ।।

\+ + + +

नभोश्रावणिके मासे भार्गवे पूर्णसंयुते।
मूढादिदोषरहिते तत्पुरश्चरणं लभेत् ॥ +

प्राङ्मुखो वापि जपं पूजां समारभेत्।
निशीथे भार्गवे वारे × × × समर्चयेत् ॥

End:

सुगन्धमाल्यकर्पूरैः कस्तूर्यादिविलेपनम्।
ताम्बूलं च प्रदातव्यं चन्द्रां लक्ष्मीं समर्चयेत् ॥

Colophon :

इति श्रीरहस्ये यामळे प्रतिभार्गववासरे पार्वतीमुखे ईश्वरप्रोक्तं नाम द्वितीयः ॥

189

Sl. No. 13425 भिन्नदेवतासम्प्रोक्षणविधिः Ms. No. P. 3023/176

Beginning :

सम्प्रोक्षणविधिं वक्ष्ये विस्तरेण यथाश्रुतम्।
हस्तपादादिभिर्भिन्नं दृष्ट्वा दूषणदूषितम् ॥

\+ + + + ।

प्रतिष्ठोक्तेन मार्गेण बिम्बं तत्स्थापयेत् पुनः।
नयनोन्मीलनं तस्य वाससा वेष्टनं चरेत् ॥

End :

मूर्तिहोमं ततः कृत्वा ब्राह्मणान् भोजयेच्छतम्।
\+ + + ॥

विष्णुस्नाने वैष्णवमन्त्रैः कुर्यात् । अतो देवा इदं विष्णुस्त्रीणि पदा विचक्रमे, इति वैष्णवसम्मन्दः ॥

Colophon:

-- -- -- --

190

Sl. No. 13426 भृगुपूजाविधिः Ms. No.P.5930/35

Beginning:

अथ भृगुपूजा-

कुन्दपुष्पसमानाभं मुक्ताफलसमप्रभम् ।
स्नापयामिमहाशन्तं गुरुं दैत्यगुरु प्रभुम् ॥

इति शुक्रस्नपनम् ॥

End:

शुक्रं ते अन्यदिति मन्त्रेण अधिदेवताप्रत्यधिदेवतासहितशुक्राय नमः इति षोडशोपचारपूज कुर्यात् ॥

Colophon :

- - - - - - -

191

Sl. No. 13427 भ्रमराम्बापूजा Ms. No.P. 5772/7

(स्कान्दश्रीशैलखण्डीयान्तर्गता-- सनत्कुमारसंहिता)

Beginning:

ईश्वर उवाच-

पूजाक्रममथैश्वर्या शृणु पार्वति सम्प्रतम् ।
श्रीशैले भ्रमराम्बायाः कर्तव्यं सिद्धिसाक्षिभिः ॥

दिविष................ संघुष्टपादुकाम् ।
आवाहयामि देवि त्वां स्फुरितां भ्रमरांबिके ॥

End :

राजोपचारानन्यास्ते × ×या भक्त्या समर्पितान् ।
आ × स्माकं × × वरदा भ्रमरांबिके ॥

+ + + + ।

जपान्ते जगतां ईशा × × भावयेन्मनने चिरम् ।
स्तोत्रेण दशभिः पूर्वं कृतेन स्तुतिमाचरेत् ॥

Colophon:

इति स्कन्दे सनत्कुमारसंहितायां श्रीशैलखण्डे भ्रमराम्बा × × धिर्नाम पञ्चविंशोऽध्यायः ॥

192

Sl No. 13428 — भ्रमराम्बापूजा — Ms. No. P. 5772/9

भ्रमराम्बाङ्गपूजा

Beginning :

भ्रमराम्बपूजा—

पद्मवा × × यै नमः पादौ × × × × ।

सिद्धिं शृद्धां कलयतु मम श्रीगिरिशिरः कृतावासानश्वत्थामरपदनामा शिव - कण - - - × × ते । प्रोद्यन्मण्डलबिभ्रमादनन्तं लोकस्सुख खेलति । सामेसिद्धि-विधायिनी — प्रणमं - - - तावासिनिस्सन्धिस्याभ्रमराम्बिका शिव ×× श्रियस्समृद्धि-सदा ॥

×××× स्वयै नमः ; जानुनी पूजयामि ।
शुभगुणावासायै नमः ऊरूं पूजयामि ॥

End :

सुप्रभायै । ब्रह्मेन्द्रादिनाबि × × ।
रूपिण्यै । सत्यात्मिकायै ।
भक्तवत्सलायै । भुक्तिमुक्तिफलप्राप्तिकरिण्यै, ।

श्रीभ्रमराम्बायै नमः नामावळी पूजां समर्पयामि ॥

Colophon :

– – –

Extra Information :

अयं च ग्रन्थः अशुद्धभूयिष्ठः । अथापि देवताराधकानां यत्किञ्चिदुपयोगः मार्गदर्शने भवेदिति मन्यामहे ॥

193

Sl. No. 13429 **मठस्थापनविधिः** **Ms. No. P. 4142/1**

(स्वयम्भूप्रतिष्ठातन्त्रान्तर्गतः)

Beginning:

प्रतिष्ठा च मठादीनां प्रवेशश्चाभिधीयते ।
शिल्पिनां च विसृज्याथ गोप्रवेशमठं क्रमात् ॥

End :

स्थापनं जीर्णलिङ्गादेः उद्धारश्चापि तत्परम् ।
मठादीनां प्रतिष्ठाक्षमालायाश्च प्रकीर्तितः ॥

Colophon :

